ध्वजमारोप्य कर्तव्यं पश्चाद्यागादि पूजनम् ।
ग्रामः सायं च कर्तव्यं बलिहोमं समाचरेत् ॥ ५२

ध्वजारोहणतीर्थान्तं दिनेषु च सुपूजयेत् ।
ग्रामः प्रदक्षिणं कुर्यात् सायं प्रातः समाचरेत् ॥ ५३

सप्ताहे वा नवाहे वा रथोत्सवमथाचरेत् ।
चूर्णोत्सवतीर्थं च तदंते कारयेद्बुधः ॥ ५४

कुम्भाभिषेकमूलस्य बेरं योज्या विशेषतः ।
अवरोहणतः कुर्यात्सन्धिदेवान्विसर्जनम् ॥ ५५

प्रायश्चितार्थतत्सर्वमीशसूक्तं वदाचरेत् ।
मन्त्रभेदो भवेत्तत्र क्रियाभेदो न विद्यते ॥ ५६

आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
एवं प्रमाणं यः कुरुते मर्त्यो स पुण्यां गतिमाप्नुयात् ॥ ५७

शास्तास्थापनोत्सवविधिः ॥
मण्टपपूजा ॥

यागस्य मण्टपं कृत्वा ऐशान्ये वह्निगोचरे ।
वारुण्यां सन्निधौ वापि कर्तव्यं यागमण्टपम् ॥ ५८

पञ्चषट्सप्तहस्ते वा षोडशस्तम्भसंयुतम् ।
तन्मध्ये वेदिकां कुर्यात् द्वयंत्रीणि चतुष्करम् ॥ ५९

उपवेदि च यः कुर्यात् द्वित्रिदङ्गुल्याश्रयम् ।
वेदिबाह्येतिपरितः पञ्चकुण्डानि कारयेत् ॥ ६०

एकाग्निर्वाथ कर्तव्यं वृत्तकुण्डं महाग्निना ।
वेदिमध्ये विशेषेण भारपञ्चाभिशालिना ॥ ६१

तदर्धेस्थण्डिलैर्माषैस्तदर्धैश्च तिलैरपि ।
तदर्धोजसम्युक्तं दर्भैः पुष्पैः परिस्तरेत् ॥ ६२

तन्मध्ये नलिनं लिख्य साष्ठपत्रं सकर्णिकम् ।
मध्ये शास्तामूर्तिकुम्भं संस्थाप्योभयपार्श्वयोः ॥ ६३

पूर्णापुष्कलाकुम्भं शक्तिकुम्भं स्थाप्य ।
परितः कलशानष्टौ शास्ताष्टपरिवारकम् ॥ ६४

मदनो भीषणश्चैव उन्मत्तो उग्रभैरवौ ।
आचार्यो सौन्दरश्चैव वीरो शास्ताष्टमर्चयेत् ॥ ६५

सामान्यास्त्रं तु सङ्कल्प्य,
द्वारान्संप्रोक्ष्य वास्त्रतः,
अस्त्राय नमः ।

प्रोक्ष्य,

अर्घ्यपात्रमादाय,

स्थिरासनं सङ्कल्प्य,

प्राणायामः ।

करन्यासांगन्यासं विधाय,

भूतशुद्ध्यन्तर्यामिं कृत्वा,

द्धारमन्त्रेण संप्रोक्ष्य,

कवचेनावकुण्ट्य,

पूर्वद्धारतोरणे, ओं हां आदिशास्ताय विजृम्भाय नमः ।

दक्षिणद्धारतोरणे, ओं हां वीरशास्ताय लोहिततोरणाय नमः ।

पश्चिमद्धारतोरणे, योगशास्ताय भूतितोरणाय नमः ।

उत्तरद्धारतोरणे, भोगशास्ताय शान्तितोरणाय नमः ।

इति चतुर्द्धारं सम्पूज्य,

पूर्वद्धारे द्धौ द्धौ संपूज्य,

ॐ श्रीं हीं क्लीं कामिन्यै नमः ।

पूर्वेभूतमाताय नमः ।

दक्षिणे, महाभूताय नमः ।

पश्चिमे, ॐ हां वेताल भूताय नमः ।

उत्तरे, ॐ हां शिंजिनीभूताय नमः ।

इति संपूज्य,

ॐ ह्रां शास्ताय ऐरावताय नमः ।

ॐ ह्रां शास्ताय पुण्डरीकाय नमः ।

ॐ ह्रां शास्ताय वामनाय नमः ।

ॐ ह्रां शास्ताय शङ्कुकर्णाय नमः ।

ॐ ह्रां सर्वनेत्राय नमः ।

ॐ ह्रां सुमुखाय नमः ।

ॐ ह्रां सुप्रतिष्ठाय नमः ।

ॐ ह्रां अञ्जनाशास्ताय नमः ।

इत्यष्टगजं संपूज्य,

ॐ ह्रां इन्द्रशास्ताय नमः ।

ॐ ह्रां अग्निशास्ताय नमः ।

ॐ ह्रां यमशास्ताय नमः ।

ॐ ह्रां निर्ऋतिशास्ताय नमः ।

ॐ ह्रां वरुणशास्ताय नमः ।

ॐ ह्रां वायुशास्ताय नमः ।

ॐ ह्रां कुबेरशास्ताय नमः ।

ॐ ह्रां ईशानशास्ताय नमः ।

नैर्ऋते ॐ ह्रां ब्रह्मशास्ताय नमः ।

ऐशान्ये ॐ ह्रां विष्णुशास्ताय नमः ।

इन्द्राग्निमध्ये ॐ हां हीं शिवसूर्याय नमः ।

इति सम्पूज्य,

तत्तत्स्थानमन्त्रैः नमोन्तं सम्पूज्य,

इत्यभ्यर्च्य,

दर्शनार्घ्यं दत्वा,

नैवेद्यं कदलीफलताम्बूलं च दत्वा,

धूपदीपं दत्वा,

वेदिकोपरिमूर्तिकुम्भं सम्स्थाप्य,

मूर्तिकुम्भार्चनं धर्मज्ञानवैराग्यैश्वर्यादीन्संपूज्य,

शास्ताय स्थिरासनाय नमः ।

ॐ हां वीरासनाय नमः ।

ॐ हां योगासनाय नमः ।

इत्यभ्यर्च्य,

ॐ ह्रां हरिहरपुत्राय ईशानमूर्धाय नमः ।

ॐ हां हरिहरपुत्राय तत्पुरुषवक्त्राय नमः ।

ॐ हां हरिहरपुत्राय शत्रुनाशनाय अघोरहृदयाय नमः ।

ॐ हां हरिहरपुत्राय मदगजवाहनाय वामदेवगुह्याय नमः ।

ॐ ह्रां हरिहरपुत्राय महाशास्ताय सद्योजातमूर्तये नमः ।

ॐ ह्रां हरिहरपुत्राय हृदयाय नमः ।

ॐ ह्रीं हरिहरपुत्राय शिरसे नमः ।

ॐ ह्रूं हरिहरपुत्राय शिखाय नमः ।

ॐ ह्रैं हरिहरपुत्राय कवचाय नमः ।

ॐ ह्रौं हरिहरपुत्राय नेत्रत्रयाय वौषट् ।

ॐ हः हरिहरपुत्राय अस्त्राय हुं फण्णमः ।

ॐ अं ह्रां आं मूर्ध्ने नमः ।

ॐ इं ह्रीं ई वक्त्राय नमः ।

ॐ उं ह्रूं ऊं हृदयाय नमः ।

ॐ ऐं ह्रैं औं गुह्याय नमः ।

ॐ ह्रौं औं जानुभ्यान्नमः ।

ॐ हः अं पादाभ्यां नमः ।

ॐ ह्रं वक्त्रपङ्क्तये महाशास्त्राय नमः ।

ॐ ह्रं मदनमोहिनीशास्त्राय हृदयाय नमः ।

ॐ ह्रां प्रचण्डमोहिनीशास्त्राय शिरसे नमः ।

ॐ ह्रां सर्वलोकवशीकरीशिखायै नमः ।

ॐ ह्रां सर्वराजवशीकरीकवचाय नमः ।

ॐ ह्रां सर्व स्त्रीपुरुषवशीकरीनेत्रत्रयाय नमः ।

ॐ ह्रां मोहिनीशास्त्राय अस्त्राय नमः ।

ॐ ह्रां सर्वलोकवशीकरी अस्त्रावकुण्ठनं दिग्बन्धः ।

हरिहर शरीर जन्म मरतक मणि भङ्ग

मेचक छाया जयतु तव देव शास्ता

सकल जगश्चिन्ता मोहिनी मुक्तीः

ऋत्विगक्षर सम्युक्तं संश्रतुर्गुणमालिखेत् ।

सर्व भूतविषाणाश्च लोकत्रयवशीकरीः ।

नैवांत शास्तामारुह्य सर्व काम फल प्रदा ॥

इति ध्यानमावाह्य,

ॐ ऐं श्रीं ह्रीं नैवान्ताय, कलियुगप्रत्यक्षरूपाय, अनेक भूतविग्रहस्वरूपाय, सप्तकोटिमन्त्रस्वरूपाय, सृम्भणिदंष्ट्र कालभूताय, सप्तलोकसप्तबाहुपृष्टरूपाय, हस्तौ पुष्पाञ्जलि गतौ, मूल प्रासाद मन्त्रवान् , ओं श्रीं ह्रीं क्लीं ऐं परमशिवं दिव्यश्रीगुरुभ्यो हरिहरपुत्राय पुत्रलाभाय शत्रु नाशाय मदगजवाहनाय महाशास्ताय मूर्तये नमः ।

कुम्भमूले अञ्जलिपुष्पं संयोज्य, ध्यायामि ।

ॐ ह्रां महाशास्ताय नमः ।आसनाय नमः ।

ॐह्रां हं ह्रां ह्रौं शः ।

ॐ श्रीं ह्रीं क्लीं महाशास्ताय मूर्तये नमः ।

आवाहनमुद्रां प्रदर्शयेत् ।

ॐ श्रीं ह्रीं क्लीं महाशास्ताय अमृतान्तनाथाय नमः

स्थापनादि मुद्रां प्रदर्शयेत् ।

ॐ श्रीं ह्रीं क्लीं महाशास्ताय अमृतांताय नमः । स्थापनादि मुद्रां प्रदर्शयेत् । ॐ श्रीं ह्रीं क्लीं महाशास्ताय परिमृधाय नमः सन्निधानं प्रदर्शयेत् । ॐ श्रीं ह्रीं क्लीं महाशास्ताय स्त्रीरूपाय नमः । सन्निरोधनमुद्रां प्रदर्शयेत् । ॐ श्रीं ह्रीं

क्लीं महाशास्ताय मेधाय नमः । तिरोधान मुद्रां प्रदर्शयेत् । ॐ श्रीं ह्रीं क्लीं महाशास्ताय सर्वसिद्ध्यै नमः ।

अस्तावकुण्ठनमुद्रां प्रदर्शयेत्

इत्यभ्यर्च्य,

कुम्भादिभिर्दर्शनं कृत्वा,

पद्ममुद्रां महामुद्रां च प्रदर्शयेत् ।

इति शक्तिकुम्भं उभयपार्श्वे पूर्णापुष्कलामभ्यर्च्य,

चन्द्रजातस्तु पूर्णायां सूर्यजातस्तु पुष्कला ।

उभयोः शक्तिरूपं तु शास्ता शक्ति स्वरूपकम् ॥ ६७

पीठमध्ये तु शास्तारं पूर्णापुष्कल पार्श्वयोः ।

एकपीठं समाख्यातं ब्राह्ममूर्तिं स्थापयेत्सुधीः ॥

पूर्णापुष्कलरूपन्तु कटकचोत्पलन्तु वरं च शक्तिसहित

बेरं शक्तिध्ररहितं ततः ।

पूर्णशक्तिं समभ्यर्च्य,

ॐ श्रीं ह्रीं क्लीं ऐं पूर्णानन्दासनायै नमः ।

ॐ पूर्णानन्दाय शक्तिमूर्तये नमः ।

ॐ पूर्णानन्दाय शक्तये नमः ।

ॐ श्रीं ह्रीं क्लीं पुष्कलायै नमः ।

ॐ पुष्कला शक्त्यासनायै नमः ।

ॐ पुष्कलाशक्तिमूर्तये नमः ।

ॐ पुष्कलाशक्त्यानन्दायै नमः ।

आवाहनमुद्रां तु पद्मयोनिमहामुद्राणि प्रदर्शयेत् ।

परितः कुम्भाष्टमभ्यर्च्य,

ॐ हां भूलोकाय मदनाय नमः ।

ॐ हां भुवर्लोकाय भीषणाय नमः ।

ॐ हां सुवर्लोकाय रुद्राय नमः ।

ॐ हां महर्लोकाय उन्मत्ताय नमः ।

ॐ हां जनर्लोकाय उग्रभाषिणे नमः ।

ॐ हां तपोलोकाय आचार्याय नमः ।

ॐ हां सत्यलोकाय सुरेशाय नमः ।

ॐ हां सर्वलोकवीरिशाय नमः ।

इत्यभ्यर्च्य बाह्यपद्मधेनुमुद्राणि प्रदर्श्य,

पाद्याचमनार्घ्यौ च नैवेद्यादिकं दत्वा,

प्रार्थयेत् ,

सम्योज्य,

उपवेदिपरिताष्टमङ्गलदेवतामभ्यर्च्य,

आवाह्य, दर्पणे

तुं कैसे होॐ हां भूतरूपाय नमः ।

पूर्णकुम्भे महाकायाय नमः ।

वृषभे महाकुक्षये नमः ।

युग्मचामरे महच्छिराय नमः ।

श्रीवत्से बृहत्कुक्षये नमः ।

स्वस्तिके मधुकरायै नमः ।

शङ्खे चित्रगुप्तायै नमः ।

दीपे मेनकायै नमः ।

इत्यभ्यर्च्य,

दशायुधानि पूजयेत् ।

शक्तिवज्रे यक्षेशाय नमः ।

शक्त्यै राक्षसेशाय नमः ।

दण्डे पैशाचाय नमः ।

खड्गे महाभूताय नमः ।

पाशे गन्धर्वाय नमः ।

अङ्कुशे किन्नराय नमः ।

गदे धनेशाय नमः ।

शूले विद्याधराय नमः ।

चक्रे विष्णवे नमः ।

पद्मे ब्रह्मणे नमः ।

इत्यभ्यर्च्य,

गन्धपुष्पैरभ्यर्च्य,

श्रीं क्लीं बीजेन संयुक्तं,

धूपदीपं दत्वा,

पार्श्वाद्यागे शाराधनं क्रमात् शृणु

कुण्डसमीपस्थ होमोपकरणादिकम् कुण्डस्य कृत्वा,

संस्कारवीक्षणाश्च विधीयते ।

अष्टादशसंस्कारं आसनं तत्र विन्यसेत् ।

वागीशवागीशीमभ्यर्च्य,

आवाह्य,

शास्तामूर्तिवदग्निमध्ये समावाह्य,

परिवारगणैश्च वा अर्चयेत्,

समिदाज्यचरुपालाजपयसर्पिपाश्वर्णयवास्थिमुद्गमाष

कुलित्थाश्चणकान् मूलेन तु होमयेत् ।

अष्टोत्तरसहस्रं वा तदर्धं वा तदर्धकम् ।
मेषकुक्कुट मांसं वा हुत्वा होमं समाचरेत् ॥ ६९

प्रत्यामानघ हविर्दत्वा आज्यमिश्रेण होमयेत् ।
पञ्चब्रह्मं च मूलं च षडङ्गस्य च विन्यसेत् ॥ ७०

अष्टमूर्तिन्यसेत्तत्र प्रतिसरं बन्धयेत्ततः ।
तण्डुलं कौतुकं चैव ताम्बूलं सहविन्यसेत् ॥ ७१

स्थालिकोपरि विन्यस्य वस्त्रमाच्छाद्यमेव च ।
परिवारकादि तत्स्थानेषु बन्धयेत् ॥ ७२

प्रदक्षिणं शास्ता सन्नदधिमावेन त्रिपादौ परिविन्यस्य विघ्नेशं पूजयेत् । तत्र सङ्कल्प्य पुण्याहं वाचयेत् । तत्र प्रोक्षयेत् । शास्तामूर्तिषु प्राणायामं च फलेन आरभेत् । कौतुक ब्रह्ममन्त्रेण निरीक्षणादि चतुस्संस्कारादि पद्मधेन्वाख्यादि धूपदीपं दत्वा, शास्ता मूर्तिमभ्यर्च्य, आलयांतमपामङ्गं अभ्यर्च्य, मूर्तिं बिम्बवत् शास्ता ब्रह्मं समभ्यर्च्य, मूर्धादि पादपर्यन्तं विन्यस्य, तत्तत्स्वस्वमुद्राभिर्न्यसेत् । धूपदीपं दत्वा, पश्चात् कौतुकबन्धनं त्र्यम्बकस्य मन्त्रतः ब्रह्मसामेति मन्त्रेण कौतुकं बन्धयेत् । अर्घ्यपाद्यादि नैवेद्यान्तं दत्वा, आरात्रिकं च कुर्यात् । षोडशैरुपचारकैः भस्मं तु दापयेत् पश्चात् भक्तानां दापयेत् । ततः होमान्ते बलिदानं च प्रतिमाम्बलमेव च ।

मेष कुक्कुट-माहिष्यं मधुमांसं तथैव च ।
अशवान्यप्रकारेण अपूपं तिलचूर्णयुक् ॥ ७३

रात्रिचूर्णं च कूष्माण्डं बलिदानं च विशेषतः ।
चन्दनं रक्तपुष्पश्च धूपदीपं प्रदापयेत् ॥ ७४

दीपं प्रदापयेत् । मूलमन्त्रेण तृप्त्यर्थं दिनं प्रति बलिं ददेत् । सायं प्रातः शुद्धान्नं बलिमाचरेत् । शास्तालङ्कारसंयुक्तं सर्वाभरणभूषितम् यागं तीक्ष्णं चैव प्रातः सायं समाचरेत् ।

ध्वजारोहण तीर्थान्तं दिनं प्रति विशेषतः ।
प्रथमं पीठमारोप्य द्वितीयं रङ्गमेव च ।
तृतीयं भूतमित्याहुः शयायां च चतुर्थकम् ॥ ७५

पञ्चमं तु वृषारोढं षष्टं वै गजवाहनम् ।
कैलासं सप्तमं चैव अष्टमं तुरगं भवेत् ॥ ७६

नवमं तु रथारूढं दशमं शिबिकां पुनः ।
दिनं प्रति विशेषेण वाहनारूढमेव च ॥ ७७

॥ शास्तारस्थापनम् ॥

नित्यपूजाविधिः

बालो तरुणभक्तिश्च वीरोशक्तिर्द्विजस्तथा ।
पिङ्गलोच्छिष्टविघ्नेशोक्षिप्रोहेरम्बनायकः ॥

लक्ष्मीनृत्तमहाविघ्नो विजयः कल्पहस्तक ।
ऊर्ध्वविघ्नेशपर्य. . . . . नामधेयकः ॥
एतेषां प्रतिरूपाणां ध्यानानां अधुनोच्यते

बालगणपतिध्यानम् :-

करस्थकदलीचूतपनसेक्षुकमोदकम् ।
बालसूर्यप्रभं वन्दे देवं बालगणाधिपम् ॥

तरुणगणपति ध्यानम् :-

पाशाङ्कुशापूपकपित्थजम्बूफलं तिलापूपमपि स्वहस्तैः ।
धत्ते सदायस्तरुणारुणाङ्गः पायात्सायुष्मान् तरुणोगणेशः॥

भक्तिगणपतिध्यानम् :-

नालिकेराम्रकदलीगुडपायसधारिणम् ।
शरत्छशाङ्कसङ्काशं भजे भक्तिगणाधिपम् ॥

वीरगणपति ध्यानम् :-

वेतालशक्तिशरकार्मुकखड्गखेटखट्वाङ्गमुद्गर-
गदाङ्कुशनागपाशान् ।
शूलं सकुन्दपरशुध्वजमुद्वहन्तं वीरंगणेशं
अरुणं सततं स्मरामि ॥

शक्तिगणपतिध्यानम् :-

आलिङ्ग्यदेवीं हरिणांनिषण्णां
परस्पराश्लिष्टकटीनिवेशम् ।
सन्ध्यारुणं पाशसृणीवहन्तं
भयापहं शक्तिगणेशमीडे ॥

द्विजगणपतिध्यानम् :-

यः पुस्तकाक्षगुणदण्डकमण्डलुश्रीः
निर्वर्त्यमानकरभूषणमिन्दुवर्णम् ।
स्तम्बेरमाननचतुष्टयशोभमानं
नित्यं स्मरेद्द्विजगणाधिपतिं सधन्यः ॥

पिङ्गलगणपतिध्यानम् :-

पक्वचूतफलकल्पमञ्जरीमिक्षुदण्डतिलमोदकैः सह ।
उद्वहन्परशुहस्त ते नमः श्री समृद्धियुतदेवपिङ्गल ॥

उच्छिष्ठगणपति ध्यानम् :-

नीलाब्जदाडिमीवीणाशालिकुब्जाक्षसूत्रभृत् ।
दधत्वुच्छिष्टनामाख्यं गणेशःपातु मेचकः ॥

विघ्नेश्वरगणपतिध्यानम् :-

पाशाङ्कुशस्वदन्ताम्रफलवानाखुवाहनः ।
विघ्नानि हन्त्रितस्सर्वं रक्तवर्णो विनायकः ॥

क्षिप्रगणपतिध्यानम् :-

दन्तकल्पलतापाशरत्नकुम्भाङ्कुशोज्वलम् ।
बन्धूककमनीयाङ्गं ध्यायेत्क्षिप्रगणाधिपम् ॥

हेरम्बगणपति ध्यानम् :-

अभयवरदहस्तः पाशदन्ताक्षमाला
सृणिपरशुदधानो मुद्गरं मोदकं च ।
फलं अधिगतसिंह्मः पञ्चमातङ्गवक्त्रः
गणपतिरतिगौरः पातुहेरम्बनाम ॥

लक्ष्मीगणपतिध्यानम् :-

बिभ्राणोशुकबीजापूरकमिलन्माणिक्यकुम्भाङ्कुशान् ।
पाशंकल्पलताञ्च खड्गविलसज्ज्योतिः सुधानिर्झरः ॥

श्यामेनाब्ज़सरोरुहेण सहितं देवीद्वयाश्चान्तिके ।
गौराङ्गवरदानहस्तसहितो लक्ष्मीगणेशोऽवतात् ॥

नृत्तगणेशध्यानम् :-

पाशाङ्कुशापूपकुठारदन्तं चञ्चत्करं क्लृप्तवराङ्गुलीयम् ।
पीतप्रभं कल्पतरोरधस्थं भजामि नृत्तोपपदं गणेशम् ॥

ऊर्ध्वगणपतिध्यानम् :-

कल्हारबीजगणिकेक्षुकचापबाणास्त्रः
दन्तप्ररोहकगदी कनकोज्वलाङ्गः ।
आलिङ्गनोद्यतकरो हरिताङ्गयष्ट्या
देव्या करोतु शुभमूर्ध्वगणाधिपो मे ॥

कलहारशालीपनसेक्षुपरश्वधास्त्र
दन्तप्ररोहगदभृत्कनकोज्वलाङ्गः ।
आलिङ्गनोद्यतकरोहरिताङ्गयष्ट्या
देव्या दिशतुयो भयमूर्ध्वगणेशमीमे ॥

उद्दण्डगणपतिध्यानम् :-

कल्हारम्बुजबीजपुरकगदादन्तेक्षुबाणौ समं बिभ्राणो-
मणिकुम्भशालिकलशौ पाशं च चक्रान्वितम् ।
गौराङ्ग्यारुचिकशरविन्दकरया देव्यासमालिङ्गितः
शोणाङ्गः शुभमातनोतुभजतामुद्दण्डविघ्नेश्वरः ॥

आज्ञागणपतिध्यानम् :-

मुष्टिमोदकव्रीहिचूतविल ... वाहनमस्यानन्
मुक्ताहारविभूषणं शशिनिभं भास्वत् किरीटोज्वलम् ।
आज्ञा . . . दिमादिमखिलं आ ... भवानीसुतम्
न्यग्रोधाननिवासिनं शिवसुतं ध्यायेदभीष्टार्थये ॥

विनायकध्यानम् :-

वा... जानुकरेणमुष्टिसहितं इष्टव्यदद्यात्तरं
व्रीहीचूतसुपल्लवेपरकरे भूषा .. तिम् ।
शैय्यादङ्क्विद्धयेमहोशीरधरं आस्यं गजस्याननं
शुण्डाला ... लड्डुकं शशिनिभं आज्ञागणाधिं भजे ॥

महागणपतिध्यानम् :-

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पला
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्करम्भोरुहः ।
ध्यायेद्वल्लभया सपद्मकरया श्लिष्टोज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरोविघ्नेश इष्टार्थदः ॥

अश्वत्थगणपतिध्यानम् :-

कुङ्कुमवर्णचतुर्भुजं मकुटं सकडं अङ्कुशलड्डुकदन्तसुपाशम् ।
च .. दृशं गणनाथस्वरूपम् ॥

सिद्धिविनायकध्यानम् :-

शङ्खचक्रगदाब्जपाशकमलं नीलोत्पलं श्यामलम्
नानारत्नकिरीटकुण्डललसत्केयूरहारान्वितम् ।
वन्दे दिव्यसुभानुलेपकलिनं वामाङ्गललनश्रियं
भक्ताभीष्टफलैकदाननिरतं पीताम्बरं श्रीपतिम् ॥

अथ षोडशसुब्रह्मण्यध्यानम्

ज्ञानशक्तिधरः स्कन्दो देवसेनापतिस्तथा ।
सुब्रह्मण्योगजारूढो शरकाननसम्भवः ॥

कार्तिकेयोकुमारश्च षण्मुखस्तारकान्तकः ।
सेनानी ब्रह्मशास्ताच वल्लीकल्याणसुन्दरः ॥

बालश्च क्रौश्चभेत्ताच शिखिवाहन एव च ।
एतानि स्वामिनामानि षोडशंप्रत्यहम् भजे ॥

यः पठेत्सर्वपापेभ्यो स मुच्येत महामुने ।
एतेषां प्रतिरूपाणां ध्यानानामधुनोच्यते ॥

शक्तिधरस्वामिध्यानम् :-

एकास्यं द्विभुजं वामेवज्रं दक्षिणे जेकरे ।
इच्छाज्ञानक्रियाशक्तिरूपं शक्तिधरं भजे ॥

स्कन्दस्वामिध्यानम् :-

कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।
कात्यायनीसुतमहं कटिबद्धबाहुं
कौपीनदण्डधरदक्षिणहस्तमीडे ॥

सेनापतिस्वामिध्यानम् :-

नौम्यादित्यप्रदीप्तं द्विदशनयनकं षण्मुखं मन्दहासं
वामाङ्के सुस्थितसरसिरुहधृतालिङ्गितायाः प्रियायाः
उत्तुङ्गोरुस्तनाग्रे विहितकरतलांभीतिखेटासिशूलं
हारादिन्यादिदीप्तिं शक्त्यस्त्रधनुर्गदाकुक्कुटाब्जेषु-
हस्तम् ॥

सुब्रह्मण्यध्यानम् :-

सिन्धूरारुणमिन्दुकान्तिवदनं केयूरहारादिभिः
दिव्यैराभरणै र्विभूषिततनुं स्वर्गस्थसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागोज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

सुब्रह्मण्यभेदम् :-

एकवक्त्रं द्विदोर्दण्डं कटिबद्धाभयान्वितम् ।
तरुणारुणसंकाशं सुब्रह्मण्यमुपास्महे ॥

गजारूढस्वामिध्यानम् :-

एकाननं द्विनयनं वरकुक्कुटौ च
वामद्वये निशितशक्त्यभयौद्विधान्ये ।
बिभ्राणमीश्वरसुतं तपनायुताभं
नित्यं नमामि गजवाहनमिष्टसिद्धयै: ॥

शरकाननस्वामिध्यानम् :-

शक्तिं घण्टां ध्वजसरसिजौ कुक्कुटं पाशदण्डम्
टङ्कं बाणं वरदमभयं कार्मुकञ्चोद्वहन्तम् ।
पीतंसौम्यं द्विदशनयनं केकयं सौम्यमिन्द्रैः
सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

कार्तिकेयस्वामिध्यानम् :-

वरदकुलिशखेटं वामहस्तत्रयेण
दधतमभयशक्तिं खड्गमन्यत्रयेण ।
तरुणरविसमाभं साधुभिः पूज्यमानं
कमलवदनषट्कं कार्तिकेयं भजामि ॥

कुमारस्वामिध्यानम् :-

सव्यद्वयेनि शितशक्त्य सिमादधानं
वामद्वये च धृतकुक्कुटखेटकंत्व्यम् ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदान निरतं कलये कुमारम् ॥

षण्मुखस्वामिध्यानम् :-

वन्दे सिन्धूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवसेनामदरिपुसुतं वल्लभं द्वादशाक्षम् ।

शक्तिं बाणं कृपाणं ध्वजमपिचगदांचाभयं सव्यहस्ते
चापं व्रजं सरोजं कटकमपिवरं शूलमन्ये दधानम् ॥

तारकारिस्वामिध्यानम् :-

वरदमङ्कुशध्वजे च कटकचापवज्रमपि
अभयपाशचक्रखड्गं मुसलशक्तिमन्वहम् ।
द्विदशपाणिभिर्दधानमरुणकोटिसन्निभं
भजततारकमर्दनं भवविनाशकारणम् ॥

देवसेनापतिध्यानम् :-

अभयमसिरथाङ्गमङ्कुशं शक्तिशूलं वरदकुलिशपाशंपद्म-
दण्डौगदाञ्च ।
दधतमुभयपक्षद्वादशायामहस्ते द्विदशकमलनेत्रं
देवसेनान्यमीडे ॥

ब्रह्मशास्तास्वामिध्यानम् :-

वामे करे च युगले वरकुण्डिके च सव्येक्षसूत्रमभयं दधानम् ।
विशाखं वल्या युधवनजलोचनमेकचक्रं वन्दामहे वनजसम्भव
शासितारम् ॥

वल्लीकल्याणस्वामिध्यानम् :-

हस्त द्वन्द्वेक्ष माला मभयमपिधृतं कुण्डिकाश्रोणिबद्धं
सव्ये वामे निषण्णं स्रुवधृतविधिना भूयमानेनयुक्तम् ।
सर्वालङ्कारयुक्तं जलकलशधृताविष्णुनाचारुणाभं
वल्लीकल्याणवमूर्तिं सकलसुरगणैस्सेव्यमानं प्रपद्ये ॥

बालस्वामिध्यानम् :-

पद्मसव्यकटियुतवामं पद्मकान्तिनिभं एक मुखं च ।
बालवृद्धिकरमीश्वरसूनुं बालमुन्नतभुजं तं प्रणतोऽस्मि ॥

बालस्वामिध्यानम् :-

एकवक्त्रं द्विनयनं पद्मद्वयकरं गुरुम् ।
विप्रप्रियकरं वन्दे देवं बालरविप्रभम् ॥

क्रौञ्चभेदस्वामिध्यानम् :-

अभयसित कृपाणं शक्तिबाणं च सव्ये
वरदकुलिशचापं केटकान्यन्यहस्ते ।
दधतममरसेनानायकं चाष्टबाहुं
कमलवदनषट्कं क्रौञ्चभेत्तारमीडे ॥

शिखिवाहनस्वामिध्यानम् :-

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं युग्मशक्तिशिखिवाहनं गुहम् ॥

शरचापपाणिस्वामिध्यानम् :-

वज्रशक्तिशरचापपाणिनमेकवक्त्रमरविन्दलोचनम्
सव्यपादमिहदु स्थितं वामपादशिखिनिस्थितं भजे ।
गुहस्वामिशक्तिबाणधनुवज्रहस्तकङ्क ..कवक्त्र-
सरक्तकिरीटिनमेवाङ्कुश्चितदक्षिणपदस्थितं बालं सूर्यप्रभं
गुहम् ॥

शर ... भवध्यानम् :-

अरुणकिरणवर्णमम्बुजेन्यस्तपादं
अपचरणकेकीस्पृष्टभागे निवेशम् ।
कुलिशशरवराढ्यं शक्तिकोदण्डहस्तं
शरवणभवमीशं सन्ततं भावयामि ॥

सुब्रह्मण्यमूर्तिध्यानम् :-

एकवक्त्रं द्विपादं च चतुर्भुजसमन्वितम् ।
करण्डमकुटोपेतं कुन्दलावृतमूर्तिमान् ॥
वज्रशक्तिं च संयुक्तं ऊर्ध्वहस्तेधरं तथा ।
अभयमूरुहस्तौ च वरदं वाविशेषतः ॥
केवलं शक्तिसंयुक्तं सेनानीवल्लिसंयुतम् ।
मयूरवाहनं चैवरहितं वाभिशेषतः ॥
सर्वाभरणसंयुक्तं सर्वलक्षणसंयुतम् ॥

आगमस्कन्दस्वामिध्यानम् :-
कुङ्कुमवर्णचतुर्भुजयुक्तं शक्तिधरं वरदं
कटकं च वज्राभयाभयदक्षिणहस्तम् ।
स्कन्दं कुमारस्वामिस्वरूपमिदम् ॥

सुब्रह्मण्यभेदम् :-
वरदाभयहस्तौ च शूलं शक्तिसमन्वितम् ।
श्यामवर्णनिभं चैव सुब्रह्मण्यस्वरूपकम् ॥

शरवणोद्भवध्यानम् :-
कनककुण्डलमण्डितषण्मुखं वनसरोजविराजितलोचनम् ।
विहितशस्त्रशरासनपाणिनं शरवणभवदेवमहं भजे ॥

कुमारस्वामिध्यानम् :-
अभयवरदहस्तमेकवक्त्रं कुमारं
अपरकरतलाभ्यां वज्रशक्तिंदधानम् ।
मणिमकुटविराजत्पद्मवक्त्रं द्विकर्णं
प्रथमवरुणवायुस्थापितं तं कुमारम् ॥

षण्मुखस्वामिध्यानम् :-

विद्रुमनिभद्विदशहस्तरसवक्त्रं शक्तिशरखड्गं
अभयध्वजगदा च वामकरचापकुलिशं च कटकं स्यात् ।
श्यामलवरपङ्कजं षण्मुखस्वरूपम् ।

बालस्वामिध्यान् :-

चतुर्भुजं द्विनेत्रं च कर्णयोर्पद्मपिण्डधृक् ।
रत्नकुण्डलसंयुक्तं वज्रशक्तिकरद्वयम् ॥
वरदाभयसंयुक्तं शक्तिद्वयसमन्वितम् ।
हारकेयूरभूषश्च मयूरवाहनं तथा ॥
तरुणादित्यसङ्काशं शशिबालस्वरूपिणम् ॥

बालस्कन्दस्वामिध्यानम् :-

चतुर्भुजोबाल .. षो स्कन्ध .. कसंप्रभाशक्ति-
कक्कुटहस्तौ च वरदाभयकरान्वितम् ।

मयूरारूढध्यानम् :-

शक्तिं शरं च खड्गं च वज्रपाशाभयं तथा ।
कुलिशं च धनुः कूटं कटकं चाङ्कुशं तथा ॥
मयूरवाहनं चैव एकवक्त्रसमन्वितम् ।
देवसेनावल्ली च वामे दक्षिणमेव च ।
सर्वालङ्कारसंयुक्तं सर्वलक्षणसंयुतम् ॥

सुब्रह्मण्यभेदम् :-

द्विहस्तो यज्ञसूत्राढ्यो सशिखः सः त्रिमेखलः ।
कौपीनदण्डभृत्सव्येकमण्डलुमथापरे ॥

सुब्रह्मण्यभेदम् :-

कुङ्कुमवर्णचतुर्भुजयुक्तं शक्तिधरं वरदं कटकं स्यात् ।
अक्षकपादसदक्षिणलम्बं स्कन्दकुमारस्वरूपं स्यात् ॥

शरवणभवध्यान् :

शूरगणोदितसुन्दरलोचनं वरगणोद्भववाञ्छितभोगजम् ।
धनुसुतान्तकदन्तिमुखानुजं शरवणोद्भवं ईशसुतं भजे ॥

मयूरासनषण्मुखस्वामिध्यानमम् :-

कुङ्कुमानिभवर्णं च मयूरासनमेव च ।
षण्मुखद्धयपादं च द्धादशनयनं भवेत् ॥

हस्तं द्धादशं कृत्वा च आयुधं च प्रकल्पयेत् ।
वज्रं शक्तिं च दण्डं च शरं खड्गं च दक्षिणे ॥

कुक्कुटं मुसलं चैव खेटकं चापपाशकम् ।
अभयं वरदं चैव दक्षिणे वामपार्श्वयोः ॥
सर्वालङ्कारसंयुक्तं स्कन्दरूपं प्रशस्यते ।

शूरसंहारस्वामिध्यानम् :-

रसमुखकरभानुं रक्तवर्णं किरीटं
खेटं पद्मपाशं च वामे ।
शराभयशक्तिखड्गं अङ्कुशं चक्रहस्तं
सुरपतिविश्ववन्द्यं शूरसंहाररूपम् ॥

वल्लीनायकीध्यानम् :-

श्यामापङ्कजधारिणीं मणिलसत्ताटङ्ककर्णोज्वलाम् ।
दक्षेलम्बकरां किरीटमकुटां तुङ्गस्तनीं कञ्चुकाम् ॥
अन्योन्येक्षणसम्पुटां शरवणोद्भूतस्य सव्येस्थितां
गुण्यां माल्यधरां प्रवाळवदनां वल्लीश्वरीं भावयेत् ॥

देवसेनाध्यानम् :

पीतमुत्पलधारिणीं शशियतां द्धिव्यां वरालङ्कृताम् ।
वामे लम्बकरां महेन्द्रतनयां मन्दारमाल्याधराम् ॥
दध्यै चूतपादुकां शशिमुखां सेनानिवामेस्थिताम् ।
सेनां दिव्यविभूषणां द्धिनयनां देवीं त्रिभङ्गीं भजे ॥

ॐ शिवाय नमः
ॐ महेश्वराय नमः
ॐ शम्भवे नमः
ॐ पिनाकिने नमः
ॐ शशिशेखराय नमः ५
ॐ वामदेवाय नमः
ॐ विरूपाक्षाय नमः
ॐ कपर्दिने नमः
ॐ नीललोहिताय नमः
ॐ शङ्कराय नमः १०
ॐ शूलपाणये नमः
ॐ खड्वाङ्गिने नमः
ॐ विष्णुवल्लभाय नमः
ॐ शिपिविष्टाय नमः
ॐ अम्बिकानाथाय नमः
ॐ श्रीकण्ठाय नमः
ॐ भक्तवत्सलाय नमः
ॐ भवाय नमः
ॐ शर्वाय नमः
ॐ त्रिलोकेशाय नमः २०

ॐ शितिकण्ठाय नमः
ॐ शिवाप्रियाय नमः
ॐ उग्राय नमः
ॐ कपालिने नमः
ॐ कामारये नमः २५
ॐअन्धकासुर-सूदनाय नमः
ॐ गङ्गाधराय नमः
ॐ ललाटाक्षाय नमः
ॐ कालकालाय नमः
ॐ कृपानिधये नमः ३०
ॐ भीमाय नमः
ॐ परशुहस्ताय नमः
ॐ मृगपाणये नमः
ॐ जटाधराय नमः
ॐ कैलासवासिने नमः ३५
ॐ कवचिने नमः
ॐ कठोराय नमः
ॐ त्रिपुरान्तकाय नमः
ॐ वृषांकाय नमः
ॐ वृषभारूढाय नमः ४०
ॐभस्मोद्धूलित विग्रहाय नमः
ॐ सामप्रियाय नमः
ॐ स्वरमयाय नमः
ॐ त्रयीमूर्तये नमः
ॐ अनीश्वराय नमः ४५

ॐ सर्वज्ञाय नमः
ॐ परमात्मने नमः
ॐ सोमसूर्याग्निलोचनाय नमः
ॐ हविषे नमः
ॐ यज्ञमयाय नमः ५०
ॐ सोमाय नमः
ॐ पञ्चवक्त्राय नमः
ॐ सदाशिवाय नमः
ॐ विश्वेश्वराय नमः
ॐ वीरभद्राय नमः ५५
ॐ गणनाथाय नमः
ॐ प्रजापतये नमः
ॐ हिरण्यरेतसे नमः
ॐ दुर्धर्षाय नमः
ॐ गिरीशाय नमः ६०
ॐ गौरीशाय नमः
ॐ अनघाय नमः
ॐ भुजङ्गभूषणाय नमः
ॐ भर्गाय नमः
ॐ गिरिधन्विने नमः ६५
ॐ गिरिप्रियाय नमः
ॐ कृत्तिवाससे नमः
ॐ पुरारातये नमः
ॐ भगवते नमः
ॐ प्रमथाधिपाय नमः ७०

ॐ मृत्युञ्जनाय नमः
ॐ सूक्ष्मतनवे नमः
ॐ जगद्व्यापिने
ॐ जगद्गुरवे नमः
ॐ व्योमकेशाय नमः ७५
ॐ महासेनजनकाय नमः
ॐ चारुविक्रमाय नमः
ॐ रुद्राय नमः
ॐ भूतपतये नमः
ॐ स्थाणवे नमः ८०
ॐ अहिर्बुध्न्याय नमः
ॐ दिगम्बराय नमः
ॐ अष्टमूर्तये नमः
ॐ अनेकात्मने नमः
ॐ सात्विकाय नमः ८५
ॐ शुद्धविग्रहाय नमः
ॐ शाश्वताय नमः
ॐ खण्डपरशवे नमः
ॐ अजाय नमः

ॐ पाशविमोचकाय नमः ९०
ॐ मृडाय नमः
ॐ पशुपतये नमः
ॐ देवाय नमः
ॐ महादेवाय नमः
ॐ अव्याय नम ९५
ॐ हरये नमः
ॐ भगनेत्रभिदे नमः
ॐ अव्यक्ताय नमः
ॐ दक्षाध्वरहराय नमः
ॐ हराय नमः १००
ॐ पूषदन्तभिदे नमः
ॐ अव्यग्राय नमः
ॐ सहस्राक्षाय नमः
ॐ सहस्रपतये नमः
ॐ अपवर्गप्रदाय नमः १०५
ॐ अनन्ताय नमः
ॐ तारकाय नमः
ॐ परमेश्वराय नमः

ॐ वल्मीकेश्वराय नमः १०९

अखण्डपरिपूर्णद्विव्यमङ्गलसच्चिदानन्दप्रदसोमारस्कन्दवीथि-
पाठकसाम्बपरमेश्वराय नमः ।

यद्वारे मत्तमातङ्गाः वायुवेगतुरङ्गमाः ।

पूर्णेन्दुवदनानारीशिवपूजाविधेः फलम् ।
अथवा मण्डपे वापि उत्तमामध्यमाधमा ॥

तद्धारेद्धारपालौ च आसीनं वास्थितं तु वा ।
तुण्डिनांसव्यपार्श्वे तु मुण्डिनां वामपार्श्वकि ॥

रक्तवर्णद्विनेत्रश्च नागयज्ञोपवीतिनम् ।
भीमरूपं दंष्ट्रास्यश्च द्विभुजं एकवक्त्रकम् ॥

विस्मयं सूचिमुद्रैकं दण्डायुतसमन्वितम् ।
सव्यपार्श्वस्थितं वीरं डिण्डीनां देवमुच्यते ॥

मुण्डिलं कृष्णवर्णश्च द्विभुजश्च द्विनेत्रकम् ।
दण्डायुधधरं सौम्यं नागाभरणभूषितम् ॥

विस्मयं हस्तसंयुक्तं सूचीकौक्षकधारिणम् ।
मुण्डिनं द्धारपालं तं दक्षिणाङ्घ्रिस्थितं भजे ॥

पूर्वतो वसवो रुद्राः पूर्वतद्धारपालकान् ।
कालेवार्षिकपैक्षिकचैत्ररहितदेवोत्सवेद्गामने ।
संक्रान्तौ ... हणयोः दीक्षपवित्रोत्सवे ।
मित्रनीलसौम्यपैतृनिर्ऋतिः पूषाख्यशर्गेश्वरी
व्यं रोहिणीगोत्रत्रयमथो भौमार्कवारं विना ॥

सकलभुवनराजं हृद्राजराजं वृजलसद्दहिराज
भद्रकल्हारराजम् ।
यमगजमृगराजं यामिनीराजभाजं
प्रणतविबुधराजं भावयेत्यागराजम् ॥

देवं दिव्यविमानमध्यविलसत्सिम्हासनाधीश्वरम्
लावण्यामृतसागरं मृगधरं कल्हारमालाधरं ।
श्रीवासार्चितपादकिङ्किणिगणद्रावप्रभावं शिवम्
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

अम्भोजासनपूजिताङ्घ्र युगलं स्थाणुं जगत्कारणम्
जम्भारातिजयप्रदं पुरभिदं कैलासशैलास्पदं
कुम्भान्तर्जनियोगिराजविनुतं शम्भुं परं दैवतम् ।
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

दारोयं निटिलां तरालतरलब्दालाहुतित्वङ्गतः
पूरोप्यभ्रयुतेतुषारकणतोयन्मूर्ध्निर्यत्तेनिशम् ।
दाराभिन्नसदक्षिणं सलतियत्गात्रंतमेतन्तराम्
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

माराङ्गोद्भवभूतिभूषिततनुं मार्ताण्डकोटिप्रभं
वीराराधितरत्नपङ्क्ति विलसत्रजासनाध्यासितम् ।
शूराघातजलं धरंपुरहरं गङ्गाधरंशङ्करम्
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

नानारत्नविचित्रभूषणधरं नालीकनेत्रं धरं
मानामानविमानमध्यसुगिरं मार्ताण्डनालेश्वरम् ।
ज्ञानानन्दमनोहरं श्रुतिहरं वेदान्तसारं शिवम्
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

कान्तालङ्कृतवामभागविलसत्कस्तूरिपुङ्गंमुने
शान्ताम्भोजविलसत्हंसनटनोल्लासं सुखे संमुखम् ।
शान्ताकारमनेकलोकजनकं प्रत्यक्षमोक्षप्रदम्
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

अतिविचित्रपरमेषु चेष्टितं स्वयं नटित्वान्तुबाहिर्मुखाजनात् ।
तल्लोकहित्वासकलानभीष्टान् वर्षत्यहो त्यागमहाधिराजं ॥

फुल्लत्कल्हारमालाविलसितसुभुजभ्रातरं स्वान्तपद्मे
ताटङ्कालङ्कृताङ्गैर्कनकमणिमहाभद्रपीठेनिषण्णम् ।
बिन्दुर्द्दामत्प्रभातद्धिलसितमथिरांवीरखड्गभिरामं
सानन्दं स्कन्दगौरीयुतमतुलरुचीभावये त्यागराजम् ॥

आवासं कमलालये धनपतिर्भावानुसारेसखा
स्वाधीनं कलधौतशैलयुगळं शुभ्रत्कुमारीं वधूः ।
ऐश्वर्यं पुरष्टधापरिणतं त्वं विश्वविश्वाधिकं
त्यागाधीश्वरमुक्तमेवभव त्यागाध्वजारोहणम् ॥

करकलितकुरङ्गं कामिनीभूषिताङ्गम्
भुजविधृतभुजङ्गं भक्तचित्ताब्जभृङ्गम् ।
वरगणगणतुङ्गं पाव आलस्थलिङ्गम्
नतजनभयभृङ्गं नौमिवल्मीकलिङ्गम् ॥

मकुटयुतशशाङ्कं मुक्तमायाकलङ्कम्
शिखिरतरुचिराङ्कं सिद्धकर्पूरपङ्कम् ।
द्रुतभवभयशङ्कं द्रुष्कृतग्राविटङ्कं
नरपरशुभङ्गं नौमिविधिविटङ्कम् ॥

वागर्थाविवसंपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

वाहीकृतमहाधेनुगणाधिपविनायकम् ।
भवतां भवतां भूत्यै पार्वतीपरमेश्वरौ ॥

श्रीगणाधिपतये नमः ॥ देव्यै नमः ॥
त्यागराजाय नमः
श्रीगणेशाय नमः । हरिः ॐ ॥

सूर्यालयं प्रविश्य, पूर्वास्ये भास्करमर्चयेत् । ॐ रहः अस्त्राय फट् इति हस्ततलपृष्टे संशोध्य, वौषडंतमूलेनाप्लाव्य, अं अङ्गुष्ठयोः तर्जनीभ्यां ॐ अं हृदयाय नमः । कनिष्ठिका अनामिकामध्यमासु अङ्गुष्ठाभ्यां ॐ हां अर्काय शिरसे नमः । ॐ भूर्भुवस्वरोंज्वालिने शिखायै नमः । ॐ हं कवचाय नमः । हस्ततलयोर्मध्यमाङ्गुलिभ्यां भानुनेत्राभ्यां नमः । तर्जन्योः ॐ रं अस्त्राय फट् इति विन्यस्य, कवचेनावकुण्ठ्य, संयोजमूलवौषडन्तं विन्यस्य, सूर्यमूलमन्त्रेण कृतदेहशुद्धिः, दक्षिणाङ्गुष्ठेनानामिकायुक्तेन हृदि हृदयं, मूर्ध्नि शिरोमन्त्रम्, शिखायां शिखामन्त्रम्, कण्ठ प्राघर्णत्वेन स्तनमध्यांतम् तर्जनीभ्यां कवचम् मध्यमतर्जनीभ्यां नेत्रमन्त्रं, नेत्रयोः तलयोरस्त्रं च विन्यस्य, दशदिक्षु छोटिकयास्त्रेण दिग्बन्धनं विधाय, सर्वाङ्गेषु मूलमन्त्रं महामुद्रया विन्यस्यात्मानं सूर्यरूपं भावयेत् । पश्चात्ताम्रपात्रे रत्नपुष्पादितोयेन रत्नमर्घ्यं जानुभ्यामवनिङ्गतो मस्तकान्तं नीत्वा, ॐ हां हीं हूं रहः शिवसूर्याय नमः इति दर्शनार्घ्यं दत्वा, यथाशक्ति जपं कुर्यात् । ततः अर्घ्यपाद्यमस्त्रेण संशोध्य, ललाट मध्यस्पुरदरुणबिन्दुः विनिर्हतामृतधारया, ॐ स्वं

वषोल्कायसूर्यमूर्तये नमः इति गन्धोदकेन पूरयन् तत्रषडङ्गैः मूलमन्त्रेणसंपूज्यास्त्रकवचाभ्यां रक्षावकुण्ठने विधाय, मूले धेनुमुद्रांदत्वा, तज्जलैःद्रव्यमात्मानं च अस्त्रेण प्रोक्ष्य, पुष्पक्षेपणास्त्रेण विघ्नानुत्सार्य, स्थण्डिले लिखिताष्टदलपद्मे ताम्रादिनिर्मितपद्मे वा अर्चयेत् । तत्र द्वारदक्षिणपार्श्वे ॐ अं दण्डिने नमः । दण्डीत्वादप्राणीक्षणे गौरस्थूलतुंदिल कूर्चवान् । महीभाजनलेखित्यौधारयन् हस्तयोर्द्वयोः । तद्वामपार्श्वे ॐ पिङ्गलाय नमः । प्राणिनां कर्मसाक्षिं च... पिङ्ग .. श्वरपार्श्वे तु वामपार्श्वे तु प्रतीहारं च दण्डवान् । इति ध्यात्वाभ्यर्च्य, आग्नेय्या, ॐ अं पद्मसन्ध्येशाने, ॐ अं गणपतये नमः।

रक्तपद्मासनासीनं दन्तं पाशाङ्कुशौ फलं।
दधानम् च चतुर्हस्तं गजवक्त्रं गणाधिपम् ॥

इति ध्यात्वाभ्यर्च्य, तस्याग्नेय्यां ॐ अं गुरुभ्यो नमः । जटामकुटशोभाट्यं भस्मपाण्डुरविग्रहम् । योगपट्टायुतब्रह्म सूत्रनाभिस्थलोपरि। कृतयोगाख्यमुद्रां च ध्यायेत् शान्तं परं गुरुम्।

एवं ध्यात्वा, मध्ये ॐ प्रभूतासनाय नमः । इति श्वेतपीठमर्चयेत् । आग्नेयां ॐ अं विमलाय नमः। ॐ साराय नमः। ॐ अं आराध्याय नमः। ॐ परमसुखाय नम । इति सितरक्तपीतहरितसिंहरूपाणिविचिन्त्य श्वेतपीठ-मर्चयेत् । तदुपरि ॐ अं पद्माय नमः । इति सितपद्मस्य पूर्वदिशां तद्दलेषु ॐ रां दीप्तायै नमः। ॐ रिं सूक्षमायै नमः। ॐ रुं जयायै नमः। ॐ रूं भद्रायै नमः। ॐ रें विभूत्यै नमः। ॐ रैं विमलायै नमः। ॐ रों अमोघायै नमः।

ओं रौं विद्युतायै नमः । इतिकर्णिकायादीशाने ॐ रः सर्वतो-मुख्यै नमः । इति दीप्तदीपशिखाकाराध्यातयः नवशक्तयः यद्धा पद्मचामरहस्ताश्च रक्तसर्वाङ्गभूषणा । एवं ध्यात्वा अभ्यर्च्य, विस्फुरमुद्रां दर्शयित्वा, ॐ अं अर्कासनाय नमः इति अर्कासनं संपूज्य, धवलाम्भोरुहारूढं दाडिमीकुसुम-प्रभम् । स्फुरद्दीप्तमहातेजोवृत्तमण्डलमध्यगम् । हंसासक्तस्फुटश्वेत सनालाब्जकरद्धयम् । एकास्यं चिन्तयेद्भानुं द्विनेत्रं रक्तवाससम् । इति खषोल्काय सूर्यमूर्तये नमः इति आसनोपरि मूर्तिं विन्यस्य, ॐ ह्रौं भानुनेत्रेभ्यो नमः इति नेत्रं धृत्वा, पुष्पैरञ्जलिं आपूर्य, ललाटमध्यस्पुरदरुणबिन्दुनिभमञ्जलौ विचिन्त्य, ॐ हां ह्रीं रहः शिवसूर्याय नमः इत्यनेन मूलमन्त्रेण पद्मासनं दत्वा आवाहयेत् । हृदयेनावाहिनीमुद्रया वा पद्मस्थापन्या पद्मासने संस्थाप्य, संनिधान्यासंनिधाप्य, अनिष्ठुरया निरोध्य, बिम्बमुद्रां च प्रदर्श्य, सूर्यहृदयादि करान्तरस्थानेषु हृदयादिमन्त्रान् विन्यस्य ॐ अं अर्काय हृदयाय नमः । ॐ अं अर्कायशिरसे नमः। ॐ भूर्भुवस्सुवरों ज्वालिनीशिवायै नमः । ॐ हूं कवचाय नमः । ॐ हां नेत्राभ्यां नमः । मध्ये ॐ रहः अस्त्राय नमः । सूर्यमूलेनैक्यं विधाय, रक्षावकुण्ठने कृत्वा अमृतमुद्रां महामुद्रां च विधाय, पाद्याचमनार्घ्याणि दत्वा, स्वधास्वहांता खषोल्काय इति दत्वा, मूले वौषडंतेन पुष्पदूर्वाक्षतादीनि च दत्वा, ॐ स्वं खषोल्काय नमः इत्युपहृदये नाभ्यङ्गादि पूर्वेसंस्थाप्य, रक्तवस्त्र-गन्धादिभिरलङ्कृत्य ॐ हां रहः शिवसूर्याय नमः इति

पुष्पाञ्जलित्रयेणाभ्यर्च्य, अर्घ्यं दत्वा पद्ममुद्राबिम्बमुद्रां च प्रदर्श्य, ततो भोगाङ्गपूजां प्रार्थ्य, आग्नेयैशान्यनैर्ऋत वायव्यदलेषुहृदयशिरशिखाकवचमन्त्रान् सूर्यहृदयादिस्थानेषु संपूज्य, सौम्यानि रक्तवर्णानि वरदाब्जकराणि च भूषितानि द्विहस्तानि भानोः अङ्गानि भावयेत्। इति ध्यात्वा अभ्यर्च्य, देवस्य पुरमस्तद्धिनेत्रं पूर्वोक्तरूपं ध्यात्वा, अभ्यर्च्य, पूर्वादिचतुर्दलेषु अस्त्रं च विद्युत्पुञ्जनिभं चास्त्रं उग्रदंष्ट्रकरालिनम् इति ध्यात्वा अभ्यर्च्य, हृदयादीनां धेनुमुद्रां नेत्रयोः गोविषाणमुद्रां अस्त्रस्य त्रासिनीमुद्रां च प्रदशर्य, अर्घ्यं दत्वा, तदनु पूर्वादिदिक्दलाग्रेषु ॐ सं सोमाय नमः । ॐ बुं बुधाय नमः । ॐ बं बृहस्पतये नम। ॐ भं भार्गवाय नमः । इति आग्नेयादिदलाग्रेषु ॐ अं अङ्गारकाय नमः । ॐ शं शनैश्चराय नमः । ॐ रं राहवे नमः। ॐ कं केतवे नमः इत्यभ्यर्च, ध्यात्वा, सोमं कुमुदकुन्दाभं बुधं चामीकरप्रभम् गरुं गोरोचनाभासं शुक्राङ्गोक्षीरसन्निभम् रक्तमङ्गारकं ध्यायेत् कञ्जावर्तनिभं शनिम् कृष्णकृताञ्जलिं राहुं केतुं धूम्राहिसन्निभम् । कामरूपधारानेतान् दिव्याभरण-भूषितान् । वामोरुं न्यस्तहस्ताश्चदक्षहस्ताभयप्रदान् । सिक्तपद्मकरं भानुं राहुं केतुं कृताञ्जलिम् । अर्धकायोधकि शौच रक्तास्यंरक्तलोचनौ शनिं दम्ष्ट्राकरालं तु राहुं च विकृताननम् । इति ध्यात्वा अभ्यर्च्य । नमस्कार मुद्रां दर्शयित्वा, अर्घ्यं दत्वा, धूपदीपनैवेद्यताम्बूलादिदर्पण-छत्रचामराणि चान्ताराचमनार्घ्यसहितान्युपाहदानि दत्वा मूलमन्त्रं यथाशक्ति जपित्वा अर्घ्यपात्राम्भसा स्वाहान्तमूलेन

भास्कराय समर्प्य, अङ्गानादिद्वादशां जपित्वा, स्तोत्रादिकं जपित्वा, देवं नमस्कृत्य संपूज्य, खषोल्किना स्वाहांतेन पराङ्मुखार्घ्यं दत्वा, क्षमस्वेत्यभिधाय, हुंफडन्तास्त्रेण नाराचमुद्रया अङ्गादिमन्त्रान् उत्थाप्य, ॐ खं खषोल्काय सूर्यमूर्तये नमः इति दिव्यमुद्रया देवेशं संयोज्य, तन्मूलमन्त्रेण हृत्पुण्डरीकस्थे शिवसूर्यं दिव्यमुद्रया नियोजयेत् । यद्वाशिवपूजांते विसृजयेत् । सूर्यपूजानन्तरं संकल्प्य, पुण्याहं वाचयित्वा, पूर्वोक्तक्रमेणपञ्चगव्यपञ्चामृत-नित्यस्नपनं स्थापयित्वा, क्रमेणाभ्यर्च्य, धूपदीपं दत्वा, क्रमेम शिवाग्रे मण्डपे शुद्धेगोमयालेपनं कुरु । परिस्तरेण शालीनां पञ्चप्रस्थं तथोत्तमम् । प्राक्सूत्रं युगसूत्रं स्यात् उदक्सूत्रं तथैव च । तन्मध्ये नलिनं लिख्यदर्भैश्चैव परिस्तेरत् । पुण्याहं वाचयेत् तत्र पञ्चगव्यं तु साधयेत् । पश्चाग्नैर्ऋतिभागे तु स्थितं कूर्मासनोपरि । अङ्गन्यासकरन्यास अन्तर्यागमथ श्रृणु । स्नानद्रव्यादिमन्त्रं स्यात् । शुद्धयेत् पूर्वमार्गतः । शिवहस्तेन संकल्प्य शिवस्वपरिविन्यसेत् । अष्टत्रिंशत्कलान्यस्यमक्षरन्यास-पूर्वकम् । सुगन्धालेपनं कृत्वा सुपुष्पाण्यवधारिणा । स्वदेहं शिवमयं ध्यात्वार्चयेत् पञ्चगव्यकम् । यागस्य नैर्ऋतिभागे मण्डलं तत्र कल्पयेत् । तस्योर्ध्वे स्थण्डिलं कृत्वा द्रोणं वा चतुरस्त्रकम् । लिखेन्नवपदं कृत्वा प्रोष्टपात्रान् च संपूज्य आग्नेय्यादैशान्यन्तम् । कदलीफलपनसाम्राणां गन्धयेतौ यथाक्रमम् । हृदयं च शिरश्चैव शिखायां कवचं न्यसेत् । अथाभ्यर्च्य दिग्बन्धनावकुण्ठन धेनुमुद्रामृतीकरण धूपदीपं

दत्वा । प्रमाणं कदलीफलशतं च मिश्रं एकनालिकेर-चूर्णमिश्रितं दशप्रक्तगुडचूर्णमिश्रितं मधुप्रस्थद्विगुणं घृतं तथा । अमृतकदलीसुगन्धीपिशाचाकदलीफलशतं च मिश्रं अभिषेकविशेषतः । धातुरकदलीपर्वतसिह्मइक्षुकदलीनैवेद्य विशेषः । इति पञ्चामृतविधिः । तत्र वेदिकोपरि संस्थाप्य द्वात्रिंशत्प्रस्थपूरितम् । तदर्धतण्डुलं चैव तदर्थं च तिलैरपि । लाजैः पुष्पैः परिस्तीर्य तन्मध्ये नलिनं लिखेत् । मध्यमे शिवकुम्भं तु वर्धनी तस्य वामके । परितः कलशानष्टौ विघ्नेशानां समर्चयेत् । षडुत्तासनसंकल्पं आसनं मूर्तिमूलकम् । तन्मध्ये शिवमावाह्य साङ्गं संपूजयेच्छिवम् । तस्य पार्श्वे मनोन्मण्यां आवाहनं समर्चयेत् । परितश्चाष्टकुम्भादीन् विघ्नेशानां समर्चयेत् । धूपदीपं ततो दत्वा पश्चाद्दाचमनार्घ्यकम् । पश्चात् द्वारसमीपं गत्वा समाचम्य सकलीकृत्य सामान्यार्घ्यपात्रमस्त्रेण संशोध्य हृदयेन वौषडन्तेन शुद्धजलेनापूर्य प्रणवेन सप्तधाभिमन्त्र्य रक्षावकुण्ठनामृतीकरणानि विधाय द्वारमस्त्रेण संप्रोक्ष्य द्वारस्तम्भे नित्यवासार्चन ऊर्ध्वाधः पतङ्गभुवार्चनं कृत्वा, ध्यात्वा, लालिताद्विभुजाश्चैव किञ्चित् प्रहसिताननाः । कृताञ्जलिपुटास्सर्वे नानाभरणभूषिताः । इति ध्यात्वा ॐ हां नित्याय नमः ॐ हां अवसाय नमः । ॐ हां पतङ्गाय नमः । ॐ हां भुजङ्गाय नमः । इत्यभ्यर्च्य, ॐ हां गणपतये नमः । ॐ हां सरस्वत्यै नमः । ॐ हां महालक्ष्म्यै नमः । द्वारदक्षिणे नन्दि-गङ्गाचलशूलाक्षमालेदधतं कराभ्यां वामेतराभ्यां जटिलं

त्रिनेत्रम् । द्वारदक्षिणस्थां समावाद्यशाखां रक्तं स्थितं नन्दिनमाश्रयामि । ॐ हां नन्दिने नमः । तदुत्तरे तत्र विनिविष्ठमूर्ति गङ्गाशुक्लां मकराधिरूढां । हस्तद्वये दक्षिणं वामसंस्थे नीलोत्पलं पूर्णघटं वहन्तीं ध्यात्वा, ॐ हां गङ्गायै नमः । द्वारवामेतद्वामशाखस्थितकृष्णमूर्तिं नागोपवीतं जटिलं सुदंष्टिम् । कपालशूलान्वितवामसव्यकरं महाकालमहं प्रपद्ये । ॐ हां कालाय नमः । तद्दक्षिणपार्श्वे श्यामां कूर्मस्थितां वामेसव्यहस्तद्वये घटं नीलोत्पलं च बिभ्राणां यमुनां च विभावयेत् । इति ध्यात्वा, अभ्यर्च्य, ॐ हां यमुनायै नमः । द्वारोर्ध्वे दक्षिणवाममध्ये गणपतिं सरस्वतीं महालक्ष्मीमभ्यर्च्य, ऊर्ध्वोदुम्बरमुखदक्षिणे निविष्टां श्यामाङ्गं गणपतिमाश्रये दधानम् । वामे लड्डुकपरशुं कराब्जयुग्मे दन्तं च सृक् अपरत्रिचाक्षमालाम् । इति ध्यात्वा, ॐ हां गणपतये नमः । ऊर्ध्वोदुम्बर मुखवामतो निविष्टां वन्देऽहं धवलारचिं सरस्वतीं च । वामे पुस्तकं अथ दक्षिणेक्षमालां बिभ्राणां करयुगळे वराभयौ च । इति ध्यात्वा, ॐ हां सरस्वत्यै नमः । तन्मध्यतः कमलमध्यसुखोपविष्टां हस्तिद्वयोद्धृतघटादिभिः कृताभिषेकां । सव्ये वराब्जसहितां महतीं च लक्ष्मीं । वामे तु बिल्वफलपद्मधरां सुपीताम् । ॐ हों महालक्ष्म्यै नमः । कवाटद्वये विमलसुबाहुविमलं च सुबाहुं च दक्षिणवामस्थितो तथा कृताञ्जलिपुटो वापि नानाभरण-भूषितः । इति ध्यात्वा, ॐ हां विमलाय नमः । ॐ हां सुबाहवे नमः । वलये चन्द्राय नमः । श्वेतवर्णं द्विनेत्रं च

करण्डमकुटान्वितम् । सितपद्मधरं शान्तं सर्वाभरणभूषितम् । इति ध्यात्वा, ॐ हां चन्द्राय नमः । भानुं द्विनेत्रं शोणाभं पङ्कजासनमध्यगम् । सर्वाभरणसंभूष्यं रक्तपद्मकरान्वितम् । इति ध्यात्वा ॐ हां सूर्याय नमः । पट्टिकामध्ये समभ्यर्च्य, चतुर्भुजो बालवेषो स्कन्दः कनकसुप्रभः । शक्ति-कुक्कुटहस्ताश्च वराभयकरान्वितम् ॥ ॐ हां स्कन्दाय नमः ॥ ॐ क्लीं इति विघ्नेश्वरोपरिगुहमभ्यर्च्य, शङ्खेषु चापकुसुमेषु कुठारपाशैश्चक्रांकुशौ कलभमञ्जरिकासनस्थैः । पाणि-स्थितोपरि समस्थितभूषणश्रीर्विघ्नेश्वरो विजयते तपनीयगौरः । ॐ हां विघ्नेश्वराय नमः । द्विहस्ततोयजसूत्राढ्योसशिखं सत्रिमेखलः । कौपीनदण्डभृत् सर्पपाणिकट्यामतः परम् ॥ इति ध्यात्वा, ॐ हां गुहाय वरदाभयहस्ताश्च शिवशक्तिकराम्बुजाः । गोक्षीरधवलां शक्तिमीशाने च मनोन्मणीम् । इति ध्यात्वा, ॐ हां नवशक्तिभ्यां नमः ॥ द्रोकेरक कर्मशिवमभ्यर्च्य, दक्षिणभूम्यन्तरिक्षविघ्नानुत्सार्य, स्कन्दात्र मे रक्षामेषां विज्ञाप्य, न्यस्तमूलेन चक्षुषोर्ध्वं विलोक्य, द्रव्याणि, ॐ अहः अस्त्राय हुंफटिति ज्वलं नाराचमुद्रयास्त्रेणपुष्पं क्षिप्त्वान्तरिक्षगतम् । ॐ हां परशुं हुंफडितिपाशुपतास्त्रेण दक्षिणपार्ष्णिघातत्रयेणशुमिष्मानितित्रिविधान्विघ्नानुत्सार्य धूपदीपपाद्याचमनार्घ्यं दत्वा हारस्य किञ्चिद्वामशाखां समाश्रयन् दक्षिणपादपुरस्सरमन्तः प्रविश्य देहल्यां ॐ अहः अस्त्रद्वारपालाय नमः । वक्ष्यमाणरूपं विभाव्य संपूज्य,

प्रदक्षिणेन गत्वा, पटमपनीय, मङ्गलघण्टाताडन भोगशक्त्यर्चनमन्तद्धारे, ॐ श्लीं पं शुं हुं फट् पाशुपतास्त्राय नमः । इत्यभ्यर्च्य, गर्भान्तः प्रविश्य जलद्रोण्यार्चनामूलमध्यमाग्नेये ब्रह्माविष्णुरुद्रमध्ये गङ्गादि सप्ततीर्थाभिमन्त्रिण पञ्चब्रह्मषडङ्गमूलमन्त्रेण अभ्यर्च्य रक्षावकुण्ठनामृतीकरणधूपदीपौ दत्वा नैर्ऋते ॐ हां वास्त्वधिपतये ब्रह्मणे नमः । इति हंसस्थं तुन्दिलं गौणरंसृक् स्रुवं चतुराननम् । दधानं दक्षिणे वामे दण्डाक्षस्रक् कमण्डलुम् । इति ध्यात्वाभ्यर्च्य, पश्चात् देवस्य दक्षिणे भागे प्राङ्मुखासने उदङ्मुखासीन उपविश्य अस्त्रपाशार कवचावकुण्ठनाभ्यां यागसहंसरक्ष्यशिवीकरणीकुर्यात् । तत्र पूर्वं करन्यासं विधाय पादादङ्गुष्ठद्धयादारभ्य यावद्धस्तिद्धिरूपामूर्ध्वं ब्रह्मबिलान्तमेकरूपाहत्कर्णादि- सुषुम्ना पिङ्गलाभ्यां संयुक्तां अधोमुखपद्ममुकुलयुक्तां सुषिररूपां सुषुम्नां सन्चिन्त्य, तस्य एवान्तर्बहिस्त्रवतमृतधारां परमव्योमरूपिणीं शक्तिं विभाव्य, मध्ये हुङ्कारज्वलन्तं सन्चिन्त्यं पूरककुम्भकं च कृत्वा हुंकाराग्रस्थाने चित्तं निवेश्य वायुमूर्ध्वं विरोचयन् हुंफट् इति - सन्ततो उच्चारणेन पद्ममुकुलानूर्ध्वमुखान् भिन्नग्रान्थिश्च विधाय प्रतिनिवृत्य दक्षिणनाड्याविरोच्य, पुनः पूरकवायुना संहतचैतन्यम् हत्कमलाश्रितं स्फुरत्तारकाकारं सान्तबीजमयम् जीवं हृदयसंपुटितं हुंकारं मूर्ध्नि विन्यस्य, बीजविग्रहं हुंकारशिखान्तस्थं पुर्यष्टकावच्छिन्नं पुरुषं सूक्ष्मबिन्दु

भूतमेकाकिनं निरामयं ध्यात्वा, कुम्भकं कृत्वा वायुमूर्ध्व-प्रवृत्तयन् संहारमुद्रया ब्रह्मादि कारणत्यागक्रमेण एकेनोत्पातेन ॐ हूं हां हं हां हूं आत्मने नमः । इति भोगकर्मोपभोगार्थं द्वादशान्ते शिवे संयोजयेत् । तद्यथा । गन्धे पृथ्वीं रसे जलं रूपे अग्निम् स्पर्शे वायुं शब्दे व्योम एतान् मन्त्रान् समसोद्धारणहुङ्कारे वाक्पादपाणिपायु उपस्थानिराजसाहंङ्कारे । श्रोत्रत्वक्चक्षुजिह्वाप्राणाख्यानि मनश्च सात्विकाहङ्कारे स च बुद्धौसगुणेषु गुणतत्वं प्रकृतौ सरागविधे च कलायां पुंस्तत्वं कलोनियति कला च मायायां विभिन्नानि विभाव्य शुद्धविद्यातत्वं ईश्वरतत्वे तत्सदाशिवतत्वेतत्शक्तितत्वे तत्शिवतत्वे तदव्यक्षुव्यरूपेबिन्दौ विलीनं भावयेत् । शब्दस्पर्श त्यजेत्ब्राह्मे रसं वै केशवे त्यजेत् । रूपं गन्धौ त्यजेत् रुद्रेबुद्धिरंहङ्कारे ईश्वरे मनो बिन्दौ त्यजेत् पश्चात् शिवे लीनाश्चभावयेत् । यद्वा । प्रासादोच्चारणात् हृदयादिपद्मे अष्टशब्दादित्यागात् ॥ ततः स्थूलदेहं शोधयेत् । पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितम् । ब्रह्मणाकारणेश्वरेण युक्तं निवृत्तिकलारूपं चतुरश्रं पादादारभ्यमूर्धान्तं संचिन्त्य ॐ हां निवृत्तिकलायै हुंफटिति पूरकपूर्वसुषुम्नयांयावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्यां विरेचयेत् । इत्युद्धर्तपंचकेन गन्धरसरूपस्पर्शशब्दगुणानुत्सार्यपृथिवीं स्वविरुद्धवायुना विवृतं तदाकारं चिन्तयेत् । तदनु-रूप्यमण्डलं अर्धचन्द्रनिभं सौम्यं शुभमम्भोजलाञ्छितम् । हां

इत्याब्जबीजेन वामदेवनाथिनायिकेनाविप्लुनाकारेण ईश्वरेणायुक्तं प्रतिष्ठाकलारूपं पूर्ववत्विभाव्यपूर्वोक्त बहुतूद्धोत चतुष्टयेन रसादि गुणचतुष्टयमुत्सार्य स्वविरुद्ध वह्निनाभिभूतं तदाकारं चिन्तयेत् । ततः आग्नेयमण्डलं मिश्र रक्तं स्वस्तिकलाञ्छितमिति वह्निबीजनाथनायकेन अघोरेणाधिष्ठितं रुद्राकारणेश्वरेण संयुक्तं विद्याकलारूपमुद्धातत्रयेण रूपादि गुणमुत्सार्य वह्निं स्वविरुद्ध जलेनाभिभूतं तदाकारं चिन्तयेत् । पश्चात् वायु मण्डलं वायोः बिन्दुभिः षड्भिरङ्कितम् क्लीं सौमिति बीजेनाधिनायकेन तत्पुरुषेणाधिष्ठितं ईश्वररूपकारणे श्वरेणान्वितं शान्तिकलारूपमुद्धातद्वयेन स्पर्शशब्द-गुणद्वयमुत्सार्य स्वविरुद्धपृथिव्यादिभूतं तत्स्वरूपं त दाकारं चिन्तयेत् । तदनु नभोमण्डलं व्योमाकारम् शुद्धस्फटिकसन्निभं शून्यबिन्दुसमाख्येन विभूषितं हौमिति नभोबीजे नभाधिनायकेन ईशानेन सदाशिवा-कारणेश्वरेणोपेतं शान्त्यतीतकलामयमेकेनोद्धातेन शब्दगुणमुत्सार्यनित्यत्वशुद्धत्वादि स्वरूपं विमुच्य, नित्यत्वव्यापकत्वशुद्धत्वादि युक्तपरमाकाशाभिभूतं स्वरूपं भावयेत् । ततो अस्त्रेणापादादङ्गुष्ठोस्थितेनाग्निनारब्ध शरीरगतभूतदोषं दग्ध्वा चाप्लावयेत् । यद्वा स्वदेहं पृथिव्यादि भूतबीजं ब्रह्मविष्णुभ्यामुद्भिन्नाङ्कुरं रागद्वेषधर्माधर्ममोहमूलं विद्याधिपरिपालितं कलातीतत्वासारं तन्मात्रेन्द्रियशाखोपशाखं विषयालोचनपल्लवं भावप्रपञ्च-

कुसुमं बुध्यव्यवसायसङ्कल्पं फलं पुरुषे विहङ्गोपभोग्यं भोग्यभोक्तृत्वरसं ऊर्ध्वमूलमधश्शाखां वट्टतरुरूपं सन्चिन्त्य, प्रथमपुरकार्धेननिवृत्तिकलाबीजे पञ्चकोच्चारणेन पत्रपुष्पफलरहितं स्तब्धं विभाव्यापूरकपरार्धेन प्रतिष्ठाकलाबीजस्य चतुर्थोच्चारणे स्निग्धपत्रपुष्पफलोपेतं विचिन्त्य, कुम्भकप्रथमापरार्धां तां विद्याकलाबीजोच्चारितित्रयेण सव्यपादाङ्गुष्ठस्थित-कालाग्निना शुष्कपत्राधपेतं दग्धश्च विभाव्य, रेचकपूर्वार्धेन शान्तिकलाबीजोच्चारिद्धयेन भस्मीभूतं दशदिक्षु प्रलीनं विभाव्यापरार्धेन शान्त्यतीतकलाबीजस्य एकोच्चारणेन शुद्धस्फटिकरूपं परमव्योमरूपं संचितयेत् । ततो बद्धरूपं सव्यं शून्यमितिविभाव्य वौषडन्तमूलेन शिवान्त-स्थाधोमुखपद्मस्रवतमृतधाराभिस्सकलनाडीमुखं प्रविष्टाभि-स्सबाह्याभ्यान्तरं सर्वशरीरमाप्लाव्य, हृदयेनालपत्रकर्णिकारूपं पद्माकारादिमात्रात्रयसुयुक्तेन प्रणवेन शुद्धविद्यात्मकं आसनं विन्यस्य, कर्णिकायामापूर्यष्टकं चतुष्कलेन प्रणवेनावतीर्णं भावयेत् । तस्मिन् द्वादशान्तस्थं बिन्दुरूपं शिवमयं आत्मानं पञ्चकलेन प्रणवेन पूरकेण सृष्ट्या समानीय ज्योतिरूपं संस्थाप्य वौषडन्तशक्तिमन्त्रोच्चारणेक्षुद्रक्शक्तिपरिहृतबहुलामृत प्रवाहे-नाभिषिञ्चेत् । तदनु पूर्ववदङ्गन्यासं विधाय हृन्नाभिबिन्दुस्थानादिपूजाहोमसमाधीनां स्थानानि सङ्कल्प्य वक्ष्यमाणक्रमेण भावोपनीतपुष्पाद्यैः अन्तर्हृत्पद्मे शिवं

सर्वोपचारेणमनसासंपूज्य, नाभिकुण्डेस्वतस्सिद्धेग्नौ ज्ञानानलमपरसूर्यायुतसमप्रभम् हृत्पुण्डरीकमध्यस्तं सौष्ठभ्ये नवधानलं द्वादशान्ते पदे योज्य, तदर्धे अब्जपुञ्जरं पूज्य तेन विन्यस्तमार्गेण सर्वकामार्हको भवेत् इत्युक्तवत् ज्ञानानलं विन्यस्य, शिवं संपूज्य अर्घ्यपूजां समाप्य बिन्दौ सर्वतोमुखं स्पुत्तारकाकारमीश्वरं ध्यात्वा बहिः पूजयामि इति प्रार्थ्य लब्धानुज्ञास्थानशुद्धिमाचरेत् । अस्त्रेण तालत्रयं दत्वा छोटिकाभिस्तत्तूस्थानविघ्नान् चाटिकास्त्रेण परितो ज्वलदग्निवर्णं प्राकारं कवचेन दक्षिणतर्जनीभ्यामनेन परिघातत्रयं संचिन्त्य धेनुमुद्रया ॐ हौं शक्तये नमः । इति शक्तिजालमूर्ध्वादधोविभाव्य, सर्वत्र कृतरक्षस्वर्णादिनिर्मितार्घ्यपात्रं अस्त्रेण प्रक्षाल्य बिन्दुप्रहृतामृतधारामयेन शुद्धाम्बुना वौषडन्तहृदयेनापूर्यगन्धपुष्पदूर्वाक्षतादीन् निक्षिप्य, तस्मिन् आसनमूर्तिब्रह्मपञ्चकविद्यादेहनेत्रमूलाङ्गैः पुनर्मूलेन च संपूज्य, संहितयाभिमन्त्र्यास्त्रेण संरक्ष्य कवचेन अवकुण्ठ्य, धेनुमुद्रया वौषडन्तमूलेनामृतीकृत्य प्ररोचयेत् । तज्जलेनात्मानमस्त्रेण संप्रोक्ष्य पुष्पादिपूजोपकरणद्रव्यजातमस्त्रेण संप्रोक्ष्य, कवचेनावकुण्ठ्याभ्युक्ष्य, हृदादिभिरामन्त्र्य कवचेनावकुण्ठ्य धेनुमुद्रयामृतीकृत्यार्घ्यजलबिन्दून् स्नानतोयभाण्डेषु सपुष्पं निक्षिप्यामृतीकुर्यात् । इति द्रव्यशुद्धिं विधाय स्वासने ॐ हां शिवासनाय नमः । इति पुष्पं दत्वा मूर्तिं विन्यस्य चन्दनेन ललाटे तिलकं कृत्वा मूलेन शिरसि पुष्पं दद्यात् ।

इत्यात्मपूजां विधाय पूजाविरुद्धं मौनमास्थाप्य मन्त्रान् ह्रस्वदीर्घप्लुत क्रमेण ओंकारादि नमोन्तमुच्चार्य मन्त्रशुद्धिं कुर्यात् । तदानुपूर्वैरर्चितां पूजां गायत्र्यासम्पूज्य सामान्यार्घ्येण सहृदास्वाहान्तमूलेन सद्योजातादिक्रमेण पञ्चशिरस्त्वर्घ्यं धूपदीपं च नियोज्य, उपरिहस्तं निधाय, दद्यादि ब्रह्मपञ्चकमावाह्य लिङ्गात् पूजामस्त्रेणापनीय शुद्धपात्रे चण्डार्थमैशान्यां हृदयेन विन्यस्यास्त्रेण लिङ्गपिण्डिके सामान्यार्घ्यजलेन अभिषिच्यलिङ्गे अष्टपुष्पिकया आसनमूर्ति मूलमन्त्रैर्वा अभ्यर्च्य, धूपदीपं दत्वा, एवं कृत्वा स्वस्थानद्रव्यमन्त्रलिङ्गशुद्धिं शिवं पूजयेत् । तत्र पीठस्य वायव्यां दिशि दक्षिणाभिमुखं स्थितं गणपतिं पूर्ववत् ध्यात्वा, गजाननं त्रिनेत्रं तु कुङ्कुमाभं चतुर्भुजम् । पाशदन्ते तु सव्ये तु वामे त्वङ्कुशलड्डुकम् । हेमवर्णसमोपेतं सर्वाभरणभूषितम् । इति ध्यात्वा ॐ हां गणपतये नमः । उत्तरे दक्षिणाभिमुखस्थितां श्रियं पूर्वोक्तरूपां शिवशक्तिमेव संसक्तं ध्यात्वा । पद्मासने समासीनां पीतवर्णां द्विलोचनाम् । महान्तं अब्जयुगलां कराभ्यां कमलेक्षणाम् ॥ ॐ हां महालक्ष्म्यै नमः । इति संपूज्य, ईशाने सदाशिवमनन्तं च श्रीकण्ठञ्च तथाम्बिकाम् । स्कन्दं विष्णुञ्च ब्रह्माणं गुरून् सप्तस्वरं न्यसेत् । ध्यात्वा जटामकुटशोभाढ्यं भस्मपाण्डुरविग्रहम् । योगपट्टायुतं ब्रह्मसूत्रं नाभिस्थलोपरि । कृतयोगाख्यमुद्राढ्यं ध्यायेच्छान्तं परं गुरुम् ॥ इति ध्यात्वा । ॐ हां सप्तगुरुभ्यो नमः । इत्यभ्यर्च्य सामान्यार्घ्यं

दत्वा गन्धपुष्पधूपदीपादिभिः इष्टदेवं पूजयामीति प्रार्थ्य लुब्धानुज्ञः शिवं यजेत् । ततो देवस्य पीठे ॐ हां योग-पीठाय नमः । पीठस्यधोभागे मध्यतः अधः कूर्मशिलासीनां क्षीरोदसित विग्रहाम् । मौलौ बीजाङ्कुराकारां वरदाभय प्रदाम् । पाशाङ्कुशधरां शक्तिं क्रियामाधाररूपिणीम् । इति धयात्वा । पृथिव्यादि अहङ्कारतत्वान्तं । ॐ हां आधारशक्त्यै नमः । इति संपूज्य, ब्रह्मशिलोपरि पृथिवीकन्दं कलान्तैकनलाकम्भावकण्टकम् क्षुब्धमायामहापद्ममनेको-दकसङ्कुलम् । इति ध्यात्वा कलङ्कान्तं । ॐ हां अनन्तासनाय नमः इत्यभ्यर्च्य । तन्मध्येगमनन्तेशं प्रभुं व्याप्त्वास्थितं त्वधः । इति ध्यात्वा शुभ्रमायाद्यजेत् । ब्रह्मशिलामध्ये शिवासने ॐ हां अनन्ताय नमः । इति संपूज्य तत्सामर्थ्यरूपाणि विचित्रकेसरसरिप्रख्यानान्योन्यं पृष्ठदर्शनः कृतत्रेतादिरूपेण शिवस्यासन पादुकान् सितकाशीरतालाक्ष अवनिश्चारुसिह्मकृतीन् स्मरेत् । आग्नेयादीशानपर्यन्तं कोणेषु च यथाक्रमम् बुध्यदिपुरुषतत्वान्तं ॐ हां धर्माय नमः । ॐ हां ज्ञानाय नमः । ॐ हां वैराग्याय नमः। ॐ हां ऐश्वर्याय नमः । इत्यभ्यर्च्य,

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ।
चत्वारि गात्रगान्येव अनन्तेश बलानि तु ।
यद्धा गात्रगास्फटिक प्रख्यातान्तरसिह्मशिरोधृतान् ।
स्तब्धबाहुशिरोग्रीवान् पादुकासक्तमस्तकान् ।
अग्रगा तत्र पादस्थान् मस्तकान् नररूपिणः ।

इति ध्यात्वा गुणाधर्म मुखाधिष्ठायत्कन्यायजेत् । पूर्वादि चतुर्दिक्षु रागतत्वादि कलातत्वान्तम् ॐ हां अधर्माय नमः । ॐ हां अज्ञानाय नमः । ॐ हां अवैराज्ञाय नमः । ॐ हां अनैश्वर्याय नमः । इत्यभ्यर्च्य, अथ पद्मे अशुद्धमाया अधच्छदम् । ऊर्ध्वपद्मे शुद्धविद्या ऊर्ध्वच्छदनम् पुनर्मध्ये मेखलावकाशयेत् । कन्दबीजाङ्कुरनालदल केसरकर्णिका पद्म इति क्रमेणाभ्यर्च्य ध्यात्वा, पीठस्योर्ध्व-मेखलायामधोरक्तवर्णमधच्छदनं शुद्धमायान्तं विभाव्य नैऋते ॐ अधच्छदनाय नमः । दूतेर्ध्वं पाण्डुरवर्णमधोच्छदनं विशुद्ध विद्याधोभागान्ते ईशाने ॐ हां च्छदलाय नमः । इति संपूज्य तन्मध्ये ऊर्ध्व पूर्वादीशान्तं माणिक्यं सदृशं कन्दं नालनीलसमप्रभम् । अङ्कुरन्तु प्रवालाभं दल रजतसुप्रभम् । केसरहेमवर्णाभं अग्रेमुक्तावलीयुतम् । ॐ हां कन्दाय नमः । ॐ हां बीजाय नमः। ॐ हां अङ्कुराय नमः । ॐ हां नालाय नमः । खल्लपत्रे पीठोर्ध्वभागनिम्नेतु खलपत्रं प्रतीयते । तत्राब्जतक्रमादूर्ध्वं दलं केसरकर्णिका । ॐ हां दलेभ्यो नमः । इति विद्येश्वराष्टकरूपाणि दलानि संचिन्त्य, अभ्यर्च्य, तन्मूले पीठोपरि ॐ हां केसरेभ्यो नमः । पीठोन्नतमध्यभागे तप्तछाम्मीकरच्छायां पञ्चाशद्बीजगार्भिताम् । केसराणां चतुष्षष्ट्या कर्णिकां पूजयेत्ततः ॐ हां कर्णिकायै नमः । ॐ हां बीजेभ्यो नमः । इति संपूज्य, एवं समस्तरूपं पद्मं विभाव्य ॐ हां पद्माय नमः । इति पूजयेत् । यद्वासमुदितरूपं पद्मं कर्णिकां च यजेत् । ततः पूर्वादीशान्तकेसरेष्ट विद्येश्वराधिष्ठात्रिशिवशक्तिरेवं वामाद्यष्टौ शक्तिलिङ्गमूले

कर्णिकायां शिवशक्तिमेव मनोन्मणीं च उद्यद्दिनकराभासां त्रिनेत्रां च चतुर्भुजाम् ।

जडामकुटखण्डेन्दुमण्डितायातचामराम् ।

वरदाभयहस्तां च शिवशक्तिकराम्बुजाम् ॥

गोक्षीरधवलां शक्तिमीशाने च मनोन्मणीम् ।

इति ध्यात्वा

ॐ हां वामायै नमः ।

ॐ हां ज्येष्ठायै नमः ।

ॐ हां रौद्र्यै नमः ।

ॐ हां काल्यै नमः ।

ॐ हां कलविकारिण्यै नमः ।

ॐ हां बलविकरिण्यै नमः ।

ॐ हां बलप्रमथिन्यै नमः ।

ॐ हां सर्वभूतदमन्यै नमः ।

ॐ हां मनोन्मण्यै नमः । इति संपूज्य

दलाग्रवृत्ते

ॐ हां सूर्यमण्डलाय नमः ।

इति श्वेतभास्वररूपं तदधिपतिम् ब्रह्माचतुर्मुखः पीतश्चतुर्दोर्दण्डमण्डितः । सृक्दण्डाक्षकुशोपेतः सार्क-मण्डलकेश्वरः । एवं ध्यात्वा ॐ हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः । इत्यभ्यर्च्य केसराग्रवृन्ते ॐ हां सोममण्डलाय नमः । ॐ हां सोममण्डलाधिपतये विष्णवे नमः । विष्णुश्चतुर्भुजो मौलिः शङ्खचक्रगदाब्जभृत् ।

नीलाम्बुदप्रतीकाशः सोममण्डलसंस्थितः । इति ध्यात्वा ॐ हां सोममण्डलाधिपतये विष्णवे नमः । इत्यभ्यर्च्य, कर्णिकाग्रवृत्ते ॐ हां अग्निमण्डलाय नमः। तदधिपतिं रक्तवर्णं, अग्निमध्ये स्थितंरुद्रं नीलकण्ठं त्रिलोचनम् । व्याख्यामुद्रानलज्ञानं शूलहस्तं चतुर्भुजम् । सर्वालङ्कारसंयुक्तं नागयज्ञोपवीतिनम् । इति ध्यात्वा, ॐ हां अग्निमण्डलाधिपतये रुद्राय नमः । इति ध्यात्वा, कर्णिकामध्ये कुटिलात्मिकां क्षीरोदनिभां शक्तिं संचिन्त्य ॐ हां शक्तिमण्डलाय नमः । तदधिपतिं,

शक्तेश्च मण्डलासीनं व्यालयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिक निर्मलम् ॥
खड्गं त्रिशूलबाणाक्षमालाभयकरान्वितम् ।
कमण्डलुधरं देवं वराम्बुरुहधारिणम् ।
दक्षवामक्रमासिह्मगजचर्मपरिच्छदम् ।

इत्थं ईश्वरं विभाव्य शुद्धमाये ॐ हां शक्तिमण्डलाधिपतये ईश्वराय नमः । इति संपूज्य तदुपरि क्षित्यादिकुटिलाप्रान्तं एवं व्याप्तिकमासनं इति विभाव्य, ॐ हां शिवासनाय नमः । इति संपूज्य ॐ हां हं हां शिवमूर्तये नमः । इति मूर्तितेजोरूपः दण्डाकारामविभक्तावयवां शिवतत्वात्मिकां परबिन्दुव्याप्तिकां विभाव्य लिङ्गवेष्टने निवेशयेत् । अस्यां मूर्तौ ऊर्ध्वमुखहत्गुह्यपादादि सर्वाङ्गेषु

ॐ हां ईशानमूर्धाय नमः ।
ॐ हां तत्पुरुषवक्त्राय नमः।

ॐ हां वामदेवगुह्याय नमः ।

ॐ हां सद्योजातमूर्तये नमः ।

इत्यष्टत्रिंशत्कलाभेदेन विभाव्य अष्टत्रिंशत्कलान्यासं पूर्ववत् क्रमेण विन्यसेत् । शक्तिनानेन सकलो विज्ञेयो निष्कलं शिवम् । पुष्पैः अञ्जलिमापूर्य

क्षित्यादिकुटिलाप्रान्तं मन्त्रसिंहासनस्थितम् ।
शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम् ॥
पद्मासनस्थंपञ्चास्यं प्रतिवक्त्रं त्रिलोचनम् ।
दृक् क्रियेच्छाविशालाक्षं ज्ञानचन्द्रकलान्वितम् ॥
धवलेशानवदनं पीतं तत्पुरुषाननम् ।
कृष्णाघोरमुखोपेतं रक्तांभोत्तरवक्त्रकम् ॥
सुश्वेतं पश्चिमास्यैकं सद्योजातं समूर्तिकम् ।
नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम् ॥
शक्त्यसीशूलखड्वाङ्गवरव्यग्रकराबुजम् ।
दक्षिणे चाथ वामेतु डमरुं बीजपूरकम् ॥
नागाक्षसूत्रनीलाब्जं बिभ्राणं पञ्चभिः करैः ।
हारकङ्कणकेयूरैः मुद्रिकाभिरलङ्कृतम् ॥
यद्वा दक्षिणे परशुखड्गं चशूलं च वज्रं च पावकम् ।
वामभागेऽभयं घण्टां नागं पाशं तथाङ्कुशम् ॥
खड्गखेटधनुर्बाण खड्वाङ्गनृकपालिनम् ।
कुण्डिका अक्षमालां च वरदाभयमेव च ॥

आयुधैर्हस्तबृन्दानि बिभ्राणं परमेश्वरम् ।
हारकङ्कणकेयूरैः मद्रिकाभिरलङ्कृतम् ॥
सञ्चिन्त्यमूर्तेरुपरिशक्तिमातृविजृम्भणम् ।
लिङ्गाकारोपमर्देन भावने लिङ्गतां त्यजेत् ॥

ॐ हां हौं विद्यादेहाय नमः । इति ब्रह्मरन्ध्रान्तव्याप्तिकं प्रासादमुच्चार्य शिवतत्वान्तव्याप्तिकं सौदामिनीनिभं पुष्पाञ्जलिभूतं ध्यात्वा, लिङ्गारोहे विद्यादेहं समुदितरूपं विन्यस्य ॐ हौं नेत्रेभ्यो नमः । इति नेत्रं सर्वज्ञानबीजं मुखपञ्चकनेत्रेषु विन्यस्य, आवाहनमार्गे कृत्वा, हृद्गतमञ्जलिंसकुसुमं प्रासादमन्त्रं पठन्, भक्त्या निष्कलगोचरम् समरसीभावं गतः साधकः ध्यायेत्क्रमशस्वशक्ति किरणेनादे अथवाबिंदुके । निष्क्रान्तं क्रमशः स्वशक्तिकिरणे स्यादेवमावाहनम् । तद्यथा पुष्पैरञ्जलिमापूर्य, मूलमन्त्रं मेधादिदिक्कलोपेतं प्रचण्डमार्ताण्डोपमं पूरकपूर्वं ब्रह्मादिकारणत्यागक्रमेण लयान्तमुच्चरन् सर्वकर्तारं निष्कलं विभुं ज्ञानानन्दमयं स्वपरप्रकाशं संचिन्त्य, तन्मयीभूतः सृष्टिक्रमेण द्वादशान्ताम् पतङ्गबिम्बाभं ललाटेऽवतार्य चन्द्रकोटिसदृशं तिर्यक् सुधापिण्डपाण्डुरितदिङ्मण्डलं ध्यात्वा,

प्राणप्रवाहवर्त्मनाविनिर्गत्याञ्जलिगतं विचिन्त्य, लक्षमूर्तावावाहिन्या हृदयेनावाह्य स्थापिन्यायोगासने

संस्थाप्य कारणे आवाहनासनं योगे स्थाने सिंहासनं भवेत् । अर्चनायां महापद्मं विमलाख्यं तु भोजने ।

स्तोत्रेषु नृत्तगीतेषु अनन्ताख्यं स्मरेद्बुधः । एवं संभाव्यसन्निधान्यासन्निधाप्यनिष्ठुरया निरोध्य पूजास्तवे ।

आवाहनंस्वात्मनिचित्प्रकाशं तत्रस्थितस्थापन-मीश्वरस्य सान्निध्यमात्मेश्वरसन्निधानं संरोधनं स्वस्य शिवे निरोधः स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् । तावत्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु । स्वागतं विज्ञाप्य, अर्घ्यं दत्वा, हृदयादि करान्तस्थाने हृदयाङ्गानि विन्यस्य, मूलेनैकत्वं विधाय, अस्त्रेण संरक्ष्य, कवचेनावकुण्ठ्य, मूलेन अमृतमुद्रां दर्शयित्वावौषडन्तमूलेन महामुद्रया परमीकृत्य, पञ्चमुखीमुद्रां दत्वा, सहृदा नमोन्तेन पादयोः पाद्यं स्वधान्तेन ईशानादिमुखपञ्चके आचमनं, स्वाहान्तेन तथैव शिरः पञ्चकेष्वर्घ्यं दत्वा, वौषडन्तमूलेन पुष्पदूर्वाक्षतानि दद्यात् । सहृदास्वाहान्तमूलेन धूपदीपं पूर्ववत् आचमनार्घ्यौ च दद्यात् । पश्चात् स्थाने सिंहासनं भवेत् । ॐ हां सिंहासनाय नमः । इत्यभ्यर्च्य

प्रथमं गन्धतैलं च द्वितीयं पञ्चगव्यकम् ।
तृतीयं पञ्चामृतन्तु घृतस्नानं चतुर्थकम् ।
पञ्चमं पयसास्नानं दधिस्नानञ्च षष्टकम् ।

सप्तमं मधुनास्नानं इक्षुसारमथाष्टकम् ।
फलोदकं च नवमं दशमं नालिकेरकम् ।
एकादशं गन्धतोयं द्वादशं स्नपनं भवेत् ।
शङ्खाभिषेकं शुद्धान्नं धूपदीपं विशेषतः ।
प्रतिद्रव्यावसाने तु उपस्थानं सधूपकम् ।
शुद्धान्नं धूपदीपं च नैवेद्यं च विशेषतः ।

दीपिके

शुद्धमिश्रं समाकीर्णं सापूजात्रिविधा भवेत् ।
उत्तमं शुद्धशैवार्थो मन्त्रैर्युक्तमुच्यते ।
मध्यममशैववेदोक्तं अधमं वैदिकैर्मतम् ।

विजये

पञ्चब्रह्मषडङ्गैश्च पञ्चाक्षरसमन्त्रकम् ।
व्योम व्यापीं च मूलञ्च अभिषेकार्हकं विदुः ।

एवं क्रमेणाभिषिच्य विशेषार्घ्योदकेन संस्नाप्य नैवेद्यं पाद्याचममनार्घ्यौ दत्वा, धूपदीपौ दत्वा, आचमनं दत्वा, सूक्ष्मवाससोन्मृज्य, लिङ्गमस्तके मूलेन पुष्पं संपूज्य, कवचमन्त्रेण वस्त्रं धृत्वा, वामदेवेन गन्धमाल्यादिभिरलङ्कृत्य, यज्ञोपवीतपट्टगोलकाद्याभरणानि वस्त्राणि यथायुक्तं मूलेनाभिरलङ्कृत्य आचमनं दत्वा पुष्पाञ्जलित्रयेण–

ॐ हां हों आत्मतत्वाधिपतये शिवाय नमः ।

ॐ हां हौं विद्यातत्वाधिपतये शिवाय नमः ।

ॐ हां हैं शिवतत्वाधिपतये शिवाय नमः ।

गन्धपुष्पदामभिरलङ्कृत्य, अस्त्रेण घण्टां वादयन्, धूप दीपमाचमनार्घ्यं दत्वा, मनोरथमुद्रां दर्शयेत् । ततो ब्रह्माङ्गानि लयांगस्थानेषु संपूज्य, काम्यानि विज्ञाप्य, आवरणपूजार्थमध्ये लब्धानुज्ञः, शिवमूलेनाभ्यर्च्य, तस्य शिरः पञ्चकेभ्यः, ईशानमादाय, ॐ हां ईशानमूर्धायनमः । इति ईशानदले, स्फटिकाभं जगद्धेतुं त्रिनेत्रं चन्द्रमौलिनम् । सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् । इति ध्यात्वावाहयेत् । वक्त्रपञ्चकेभ्यो तत्पुरुषवक्त्रमादाय नमः। ॐ हें तत्पुरुषवक्त्राय नमः। इति पूर्वदले, पीताम्बरोपवीतं च नागं कनकसन्निभम् । मातुलिङ्गाक्षसूत्रे च दधानं चन्द्रमौलिनम् । इति ध्यात्वा यजेत् । हृत्प्रदेशादघोरमादाय, ॐ हुं अघोरहृदयाय नमः। इति दक्षिणदले, त्र्यक्षं मौळीन्दु भृत्यौभ्यं कुण्डलालङ्कृतम् ।

बभ्रूमश्रूश्चकेशं च दम्ष्ट्रालुं विकृताननम् ।

कपालमालाभरणं सर्पवृश्चिक भूषितम् ।

खड्वाङ्गं च कपालं च खेटकं पाशमेव च ।

वामहस्तश्चतुष्केषु दक्षहस्तश्चतुष्टये ।

त्रिशूलं परशुं खड्गं दण्डं चैवारिमर्दनम् ।

ध्यायेन्नवाम्बुदायासमघोरं सर्वकामदम् ।

इति ध्यात्वा आवाहयेत् । वामदेवं गुह्यमण्डलादादाय, ॐ हिं वामदेव गुह्याय नमः । इत्युत्तरदले वामं रक्तं तु रक्ताभं मालवस्त्रोपवीतिकम् । तुङ्गनासारुणोष्णीयं खड्गखेटकपाणिनम् । इति ध्यात्वा पूजयेत् । पादाद्यंगात् सद्योजातमादाय, ॐ हं सद्योजातमूर्तये नमः । इति पश्चिमदले सितासृग्गन्ध भूषाढ्यं शीतोष्णीषसिताम्बरम् । समौक्तिकसंपन्नं तं बालाकारं त्रिलोचनम् । सद्योजातं सितासौम्यं वरदाभयहस्तकम् । इति ध्यात्वाभ्यर्चयेत् । यद्धा ईशान तत्पुरुषाघोर वामजानुसोम्यलोचनानि सुश्वेतं स्वर्ण शृङ्गासृक् भीमाभं चतुराननम् ।

जटामकुटशोभाढ्यं सर्वबालेन्दु भूषितम् ।

वामैर्नागाक्षसूत्रे च नीलब्जं बीजपूर्वकम् ।

शलाभयवरां शक्तिं सव्यैर्धारयतां करैः ।

इति ध्यात्वावाहयेत् ।

नेत्रेभ्यो नेत्रमादाय ॐ हौं नेत्रेभ्यो नमः ।

इति ईशानस्योत्तरभागे ।

नेत्रं त्रिनेत्रं संयुक्तं श्वेतवर्णद्धिराननम् ।

आसूत्रीं चाक्षसूत्रं च बिभ्राणं दक्षिणे करे ।

कपालं कुण्डिकासव्ये जटाखण्डेन्दुमण्डितम् ।

अरुणाभंस्मरेन्नेत्रं दृक्क्रियेच्छात्मकं विभोः ।

त्रितत्वरूपं ब्रह्मादिमण्डलं त्रितयाश्रयम् ।
हृदाद्यंगो आवदानं करधार्यादिसंयुतम् ।
एकास्यं वा त्रिशूलाढयं हस्तं योगशिवोर्थितः ।
इति ध्यात्वावाहयेत् ।

सद्भावात्मकं हृदयं हृदयादादाय । ॐ हां हृदयाय नमः। इत्याग्नेयदले, सर्वे शिवलक्षणं शिरः शिरोदेशादादाय । ॐ हीं शिरसे नमः। इतीशानदले, नेत्रेभ्योत्तरे, अनन्याधीनवशित्वरूपं शिखां शिखादेशादादाय ॐ हुं शिखायै नमः । इति नैऋत दले, परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादादाय । ॐ हैं कवचाय नमः । प्रतापरूपं अस्त्रं हस्तेभ्यः इति वाव्यव्यदले आहृत्य पूर्वादि चतुर्दलेषु तत्पुरुषादिभ्यो वामभागे ॐ हहः अस्त्राय नमः । हृदयं चन्द्रसंकाशं हृदयश्चामीकरप्रभम् । शिखासिन्धूर वर्णाढ्याकवचं भृङ्गभास्वरम् । पद्मासनरस्थामर्धेन्दु-जटामकुटधारिणः ।

त्रिलोचनाश्चतुर्बाहून् सर्वाभरणभूषितान् ।
शिवस्याभिमुखान् शक्तिशूलाभयवराह्न्यसेत् ।
चतुर्वक्त्रानथास्त्रं च दंष्ट्रिणं पिङ्गलद्युती ।
द्विभुजानेकवक्त्रान् च वरदानभयप्रदान् ।
शूलाभयधरान् वापि ध्यायैतान् साधकोत्तमः ।

इति ध्यात्वा, एतान् शिववत् आवाहन स्थापन सन्निधान सन्निरोधन पाद्याचमनार्घ्यपुष्पदानान्तैः अष्टाभिः संस्कारैः संस्कृत्य पूजयेत् । यद्वा संस्काराष्टकंसमुदितमेवं संस्मृत्यार्घ्ये दद्यात् । ईशानादीनां च ब्रह्मणां पञ्चोपचारमुद्रां दर्शयित्वा कारणे धेनुपद्मत्रिशूलं च मकरश्च सृगाव्यकम् । ईशादि सद्योजातान्तम् यो जयेत् पञ्चवक्त्रकम् ।अङ्गादीनि च सर्वेषां अञ्जल्याख्यं तु दर्शयेत् । पश्चादर्चनायां महापद्मम् । ॐ हां पद्मासनाय नमः । इत्यासनं सङ्कल्प्य, मूलेन शिवाय पुष्पाञ्जलिं दत्वा, महामुद्रां दर्शयित्वा, सर्वेषां शिवेन सार्धमैक्यमत्यंतं भावयेत् । ततो धूपाद्याचमनार्थमुदकानि दत्वा, पश्चात् लिङ्गवशाद्बाणकावरणत्र्यावरणं पञ्चावरणानि तत्तत्क्रमेणाभ्यर्च्य, वातुले, दिव्यं स्वायम्भुवं बाणं एकावरणमर्चयेत् । त्र्यावरणपूजाश्च आर्षकं दैविकं तथा । गाणवं मानुषादीनां पञ्चावरणमर्चयेत् । द्वितीयावरणे प्राच्यामनन्तं हेमसन्निभं सूक्ष्मं च वह्निभागस्थं वन्दे वह्निसमप्रभम् ।

तमालसन्निभं वन्दे याम्यभागे शिवोत्तमम् ।

नैऋति षट्रुदाभासं एकनेत्रं व्यवस्थितम् ।

कुन्देन्दुतुहिन प्रख्यं एकरुद्रं तु वारुणे ।

त्रिमूर्तिमारुतेभागे नीहारनिभमाश्रयेत् ।

श्रीकण्ठं सौम्यदिग्भागे रक्तवर्णं व्यवस्थितम् ।

प्रपद्ये पाण्डुराकारं ऐशान्येपि शिखण्डिनम् ।

चतुरमाकूतनादिक्षु विदुवक्ष्वान्यव्यवस्थितम् ।

यद्धा विद्येश्वरान् वन्दे स्वस्वदिग्पतिसन्निभान् ।

खड्गं बाणमथाक्षसूत्रमभयं पद्मं च सव्यैः करैः । वामेखेटधनुः कमण्डलुधरान् शूलावरान् विद्रुतान् । पद्मस्थान् चतुराननान् प्रतिमुखान् नेत्रत्रयेणान्वितान् । विद्येशान् रुचिरासनान् धृतजटान् चूडेन्दुखण्डान् भजे ॥ यद्धाकरैरष्टभिरेव युक्तान् प्रागुक्तवर्णाकृतिशोभमानान् । एकाननान् प्रीतकरान् । नीतिपङ्कजरस्थान् कृताञ्जलिं ईशमुखानशेषान् ।

ॐ हां अनन्ताय नमः ।

ॐ हां सूक्ष्माय नमः ।

ॐ हां शिवोत्तमाय नमः ।

ॐ हां एकनेत्राय नमः ।

ॐ हां एकरुद्राय नमः ।

ॐ हां त्रिमूर्तये नमः ।

ॐ हां श्रीकण्ठाय नमः ।

ॐ हां शिखण्डिने नमः ।

तृतीयावरणे

तृतीयावरणे प्राच्यान् चतुर्हस्तविमानकान् ।

वराभयं चाक्षसूत्रं रक्तं सृष्टिं च नन्दिनम् ।

ॐ हां नन्दिने नमः ।

इत्यभ्यर्च्य । कपालपीतान्वितवामहस्तं खड्गं त्रिशूलान्वित पाणियुक्तम् । पीताङ्गमापिङ्गजटासुभीमं वन्दे

महाकालमथाग्निभागे ओं हां महाकालाय नमः । इत्यभ्यर्च्य,
निर्मांसविग्रहो भृङ्गीश्वेतो दण्डाक्षसूत्रभृत् ।
नृत्यत्रिनेत्रसशिखो देवालोकनतत्परः ॥ याम्ये ॐ हां भृङ्गिणे नमः ।

त्रिनेत्र वामनाकारोगजवक्त्रो महोदरः ।
पाशाङ्कुशो सदन्तो दक्षेचाम्रफलं महत् ।
शुण्डावामकराभ्यां च रक्ताङ्गो विघ्ननायकः ।
नैऋति
ॐ हां विनायकाय नमः ।
वृषोवृषाकृती त्र्यक्षो रुद्रैकगतमानसः ।
साक्षाद्धर्मस्वरूपश्च शुद्धस्फटिकनिर्मलः ॥
पश्चिमे । ॐ हां वृषभाय नमः । इत्यभ्यर्च्य,
चतुर्भुजो बालवेषोस्कन्दो कनकसुप्रभः ।
शक्तिः कुक्कुटहस्तश्च वराभयकरान्वितः ।
वायव्ये ॐ हां स्कन्दाय नमः । इत्यभ्यर्च्य
सिह्मोपरिस्थितां पीतां शूलादर्शकरधृताम् ।
करण्डमकुटां देवीं मुक्तादिभिरलङ्कृताम् ।
उत्तरे ॐ हां देव्यै नमः । इति संपूज्य
चण्डेश्वरं चतुर्बाहुं चतुर्वक्त्रत्रिलोचनम् ।
बिभ्रत्कमण्डलुं शूलमक्षसूत्रपटस्त्रजम् ।
महोरगोपवीताढ्यं तन्निर्वर्तितकङ्कणम् ।
ध्येयो नवाम्बुदाभासं समयादिनियामकम् ।

ईशाने ।

ॐ हां चण्डाय नमः । इत्यभ्यर्च्य

चतुर्थावरणे प्राच्यादिदिक्षु ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम् ।

सहस्रनयनं शक्रं वज्रपाणिं विभावयेत् ।

ॐ हां इन्द्राय नमः ।

सप्तार्चिषं च बिभ्राणं अक्षमालाकमण्डलुम् ।

ज्वालामालाकुलंरक्तं शक्तिहस्तं छगासनम् ।

इति ध्यात्वा

ॐ हां अग्नये नमः ।

कृतान्तमहिषारूढं दण्डहस्तं भयानकम् ।

कालपाशधरं कृष्णं ध्यायेद्दक्षिणदिक्पतिम् ।

ॐ हां यमाय नमः ।

रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम् ।

कृपाणपाणिमाश्रव्यं बिभ्रन्तं राक्षसेश्वरम् ।

इति ध्यात्वा

ॐ हां निर्ऋतये नमः ।

नागपाशधरं हृष्टं रत्नौघद्युतिविग्रहम् ।

शशाङ्कधवलं ध्यायेत् वरुणं मकरासनम् ।

इति ध्यात्वा

ॐ हां वरुणाय नमः ।

आपीनहरितश्चायं विलोलध्वजधारिणम् ।

प्राणभूतश्च भूतानां हरिणस्थं समीरणम् ॥

इति ध्यात्वा,

ॐ ह्रां वायवे नमः ।

कुबेरमनुजासीनं सर्वाकर्षणविग्रहम् ।

स्वच्छायाङ्गदहस्तं च उत्तराशापतिं स्मरेत् । इति ध्यात्वा

ॐ ह्रां कुबेराय नमः ।

ईशानं वृषभारूढं त्रिशूलं व्यालधारिणम् ।

शरच्चन्द्रनिभाकारं चन्द्रमौलिं त्रिलोचनम् ।

इति ध्यात्वा

ॐ ह्रां ईशानाय नमः ।

ईशानदक्षिणे पीतं पीनं चतुर्बाहुं ब्रह्माणं चतुराननम् ।

हंसयानं च बिभ्राणं दण्डाक्षं स्रृक्कमण्डलुम् ।

इति ध्यात्वा

ॐ ह्रां ब्रह्मणे नमः ।

नैर्ऋत्युत्तरे

अनन्तपुण्डरीकाक्षं फणदाशशतैर्युक्तम् ।

विद्युद्दामप्रतीकाशं कूर्मारूढं कृताञ्जलिम् ।

इति ध्यात्वा

ॐ ह्रां विष्णवेनमः ।

तद्बहिः,

पूर्वाद्यष्टदिक्षु पञ्चमावरणे,

वज्रं स्यात्पुरुषः स्थूलः कर्मशोतिदृढो बलिम् ।

ॐ हां वज्राय नमः ।

शक्तिस्तूयेषिताकारोरोहिताङ्गी त्रिकोणगा ।

ॐ हां शक्तये नमः ।

दण्डोपि पुरुषः कृष्णो वपुर्लोहितलोचनः ।

ॐ हां दण्डाय नमः ।

खड्गरक्तपुरुषश्चायमशरीरः क्रुद्धलोचनः ।

ॐ हां खड्गाय नमः ।

पाशः सप्तफणिः सर्पः पुरुषोपुच्छसंयुतः ।

ॐ हां पाशाय नमः ।

ध्वजोक्तपुरुषः प्रीतो व्यावृतास्यो महाभुजः ।

ॐ हां ध्वजाय नमः ।

गदापीतप्रभाकन्या सुपीनजघनस्थला ।

ॐ हां गदायै नमः ।

त्रिशूलः पुरुषो दिव्यो नभश्यामकलेबरः ।

ॐ हां त्रिशूलाय नमः ।

ईशानदक्षिणे

पद्मं च पुरुषो दिव्यो शुक्लाङ्गशुभलोचनः ।

ॐ हां पद्माय नमः ।

नैर्ऋत्युत्तरे

शतारचक्रभिर्मूर्ध्निश्चक्रश्यामधनुः पुमान् ।

ॐ हां चक्राय नमः ।

इति संपूज्य

सर्वाण्यञ्जलिहस्तानिपद्मसंस्थानि पूर्वतः ।

यज्ञादङ्गितशीर्षाणि भावयेत् पञ्चमावृतम् ।

विद्येश्वरादयस्सर्वे देवस्याभिमुखस्थिताः ।

अनन्ताद्यष्टकोणेषु पीठकण्ठे गणेश्वराः ।

पीठपादे तुलोकेशास्तदस्त्राणिशिलोपरि ।

एवं क्रमेणाभ्यर्च्य,

अर्घ्यं दत्वा,

ॐ हां विमलाय नमः ।

पञ्चवक्त्रेषु पञ्चहविः वियुधिं पानि पञ्च तु ।

संस्कारशुद्धं स्वाहान्तमूलेन दत्वा वाक्स्थले शुद्धान्नं

ऊर्ध्व वक्त्रे तु शर्करान्नं पूर्ववक्त्रके ।

तिलान्नं दक्षिणे वकत्रे मुद्गान्नं च तोथोत्तरे ।

पश्चिमे पायसं चैव तत्तद्वक्त्रे निवेदयेत् ।

ब्रह्माङ्गकानां स्वस्वमन्त्रैर्दत्वा अभावे एकस्मिन्पात्रे महाहविर्निवेद्य, अस्त्रेण घण्टां ताडयित्वा, आचमनार्घ्यं च निवेद्य, द्वारदक्षिणवामयोः बलिं निक्षिप्य, ॐ हां नन्दिने स्वाहा ।

ॐ हां गङ्गायै स्वाहा ।

ॐ हां महाकालाय स्वाहा ।

ॐ हां यमुनायै स्वाहा ।

इति बलिं दत्वा

सद्योजातेन ताम्बूलं निवेद्य मुखवासमर्घ्यं दत्वा, पुनरभ्यर्च्य, धूपदीपं दत्वा, निरीक्षणादि मुद्रां दत्वा, धूपमध्ये ॐ शङ्कराय

नमः इत्यभ्यर्च्य,

नासाग्रे तत्पुरुषमन्त्रेण भ्रामयित्वा, दीपमध्ये,

ॐ हां ब्रह्मणे नमः, इत्यभ्यर्च्य,

चतुः संस्कार मुद्रां च दर्शयित्वा,

पश्चात् धूपं मृगदीपं सारस्वताय नमः । इति

पुष्पं दत्वा,

नागदीपोपरि नागराजाय नमः । इति

पुष्पं दत्वा, गजदीपोपरि, विघ्नेश्वराय नमः ।

व्याघ्रदीपोपरि, महाशास्ताय नमः ।

हंसदीपोपरि । पुष्पं दत्वा, चतुर्मुखाय नमः ।

अश्वदीपोपरि पुष्पं दत्वा मेघनाथाय नमः ।

पात्रदीपोपरि पुष्पं दत्वा ॐ महालक्ष्म्यै नमः ।

शूलदीपोपरि अस्त्रराजाय नमः ।

वृषभदीपोपरि वृषभध्वजाय नमः ।

केतुदीपोपरि केतवे नमः ।

कुक्कुट दीपोपरि विष्णवे नमः ।

सिह्मदीपोपरि सालं पक्षिराजाय नमः ।

कार्कोटकदीपोपरि त्रिमूर्तये नमः ।

शक्तिदीपोपरि सरस्वत्यै नमः ।

पश्चात्कुम्भदीपं चतुः संस्कार सहितं रुद्राय नमः ।

इत्यभ्यर्च्य त्रिवारं भ्रामयित्वा

एवं षोडशदीपानन्तरम् ।

नीराजनपात्रं पञ्चत्रिकं वा शिवेननिरीक्षणं अस्त्रेण प्रोक्षणं कवचेनाभ्युक्षणं हुम्फडन्तेन चतुःसंस्कारं कृत्वा पञ्चब्रह्मषडङ्गसहितान् लोकपालसहितानभ्यर्च्य अग्रेण ब्रह्माणमभ्यर्च्य, भवाद्यष्टमूर्ति स्वशक्तिसहितान् वह्निसंयुक्तान् ॐ रं अग्नये नमः। भवाद्यष्टशक्ति निवृत्यादिकलान् संपूज्य, पृथिव्यादि पञ्चतत्वब्रह्मादिकारणेश्वरान् संपूज्य आवाहनादि पञ्चमुद्रां दर्शयित्वा, धेनुपद्मत्रिशूलमकरसृक् महामुद्रां दर्शयित्वा, पाद्याघ्र्याचमनार्घ्यं दत्वा पात्रान् कर्पूरवर्तिसहितं शिवमूर्ति ईशानदीपं च ब्रह्ममन्त्रेण त्रिवारं शिवमूर्ध्निर्मूलेन भ्रामयित्वा निम्बपात्रे विसृजेत् । पश्चात् पात्रवलये, शक्तये नमः । भस्मे, शिवाय नमः ।

पादे, चण्डेश्वराय नमः इत्यभ्यर्च्य,

शूलमुद्रां दर्शयित्वा,

त्रिवारं शिवमूर्ध्नि त्र्यम्बकमन्त्रेण भ्रामयित्वा, दीपपात्रे विसृजेत् । पश्चात् भस्माङ्गुष्ठानामिकाभ्यां मूर्धादिपाद-पर्यन्तं बृहत्सामेति रक्षां धृत्वा पश्चात् षोडशस्थानेषु ईशादि मूर्धादि ब्रह्मपञ्चकमन्त्राणि विन्यस्य, आचमनार्घ्यं दत्वा, पश्चात् दर्पणपादे शक्तये नमः ।

मध्ये तजोद्भवशिवाय नमः । इत्यभ्यर्च्य

पद्ममुद्रां दर्शयित्वा

चित्रं देवानामिति दर्पणम् ।

पञ्चमुखे दर्शयित्वा दण्डे ॐ ईश्वराय नमः।

वलये सात्विकाय नमः ।

वृत्ते सूर्याय नमः । इत्यभ्यर्च्य

शूलमुद्रां दर्शयित्वा ।

दूरमत्रछत्रं तु भीता इति मन्त्रेण छत्रमूर्धानं दर्शयित्वा

चामरे वायवे नमः ।

दण्डे कार्कोटकाय नमः । इत्यभ्यर्च्य

सृक्मुद्रां दर्शयित्वा

राजाधिराजायेति मन्त्रेण सव्यापसव्यं पञ्चवारं धृत्वा व्यजने

ॐ रवये नमः।

दण्डे ओं भुजगाय नमः । इत्यभ्यर्च्य

मकरमुद्रां दर्शयित्वा

वायस्तामग्रेति पञ्चवारं धृत्वा

आलवट्टे ॐ यं वायवे नमः । इत्यभ्यर्च्य

योनिमुद्रां दर्शयित्वा,

पायस्तमग्रेति पञ्चवारं दत्वा छस्त्रामग्रेति पञ्चवारं दत्वा

पाद्याचमनार्घ्यं दत्वा पश्चात्,

भोगशक्तये धूपदीपं दत्वा पश्चात् आवरणसहितम् शिवसन्तुष्टं ध्यात्वा, मन्त्रपुष्पं षोडशकलाप्रासादमन्त्रेण पुष्पं विन्यस्य सद्योजातेन पाद्यं वामदेवेनाचमनीयं शिरसेनार्घ्यं दत्वा, वेदरात्रं पठित्वा, नृत्तगीतवाद्यैरुपचारैः कृत्वा पश्चान्मध्ये ताण्डवसोमास्कन्द इन्दुशेखरसर्वत्र उत्सवबेरषडुत्थासनं संपूज्य, आसनमूर्तिमूलेन संपूज्य,

पाद्याचमनस्नानादि उपचारान् संभाव्य, नैवेद्यादिकं दत्वा, धूपदीप उपचारादि पूर्ववत्कृत्वा, पश्चात्, परिवाराणां नैवेद्यं कृत्वा, धूपदीपं दत्वा, पश्चात्, परिवारबलिं क्षिपेत् । कारणे दैविकेतु भवादीनां इन्द्रादीनान्तु मानुषम्। भूतादीनां स्वयं लिङ्गं आर्षं च परिवारकम् । वसूनाम्बाणलिङ्गं च विद्येशानान्तु दिव्यकम् । यक्षादि राक्षसं लिङ्गं लोकपालाः प्रवृत्ताः । यल्लिङ्गं पूजयित्वा तु तत्तलिङ्गं बलिं क्षिपेत् । त्रिसन्ध्यं बलिकर्तव्यं उपसन्ध्यापि नाचरेत् । अर्धयामे बलिं कुर्यात् यथाकाम्यार्थसिद्धिदम् । पायसश्चैव मुद्गान्नं तिलान्नं च गुडान्नकम् । माषान्नं च सर्पिषाण्णं च रक्ताभं चेति सप्तकम्। इति सूर्यादि शनिवारान्तं तत्तदन्नं बलिं क्षिपेत् ।

अथवा शुद्धमुद्गान्नं सप्तवारे बलिं क्षिपेत् ।

वृषादिबलिपीठान्तं तत्तदेवं बलिं क्रमात् ॥

महापीठे, अमोघं च प्रमोघं च प्रमुखोविमुखस्तथा अविघ्नो विघ्नकर्तारो बलिपीठादिदेवताः ।

एवं क्रमेणाभ्यर्च्य

बलिं दत्वा, मध्ये,

ॐ नीलरुद्राय स्वाहा ।

इति बलिं दत्वा,

अभिषिच्य पुनः, पुष्पं निक्षिप्य,

देवं नमस्कृत्य,

नित्याग्निकार्यं करोमीति विज्ञाप्य पश्चात् पाकशाले अग्नि कार्यार्थं मध्येष्ठेय लब्धानुज्ञः सामान्यार्घ्यपात्रमादाय, याम्ये

नैर्ऋतवायव्येभ्यो न्यस्यां दिशि कल्पितं कुण्डास्थण्डिलं कृत्वा, सामानाद्याः पूर्वास्योदुत्तरास्योवासमुपविश्य कुण्डेस्थण्डिले वा, मध्ये अस्त्रेण रेखात्रयं कुशेन संपाद्य कवचेनाभ्युक्ष्य रेखामेकामुत्तराग्रं च संपादयेत् । उत्तरस्यप्राग्वहृदयेन संपाद्य, कवचेनाभ्युक्ष्य, सर्वसंस्कार संपत्तीन् विभाव्य, तत्र हृदयेन दर्भकूर्चाविष्टरं दत्वा ॐ हां वागीश्वर्यै नमः । इति

श्यामांक्रतुमतीं ज्ञात्वा सर्वसौभाग्यभूषणाम् ।

प्रसन्नवदनां पद्मां पद्माभनयनत्रयाम् ।

इति ध्यात्वा, तद्वद्वागेश्वरं देवम्,

ॐ हां वागीश्वराय नमः । इति ध्यात्वा, संपूज्याघ्यादिकं दत्वा, पश्चादरण्यादिसंभवं शुद्धवेशमसंभवं वा वह्निं शुद्धपात्रे समानीय, क्रव्यादांशं परित्यज्य निरीक्षणादि चतुः संस्कारैः संस्कृत्य, ॐ हां वह्निमूर्तये नमः ।

इत्यभ्यर्च्य, अनेन मन्त्रेण संहारमुद्रया वह्निमादाय पूरकेणेकयाकृष्यकुम्भकेननाभ्याग्निना बैन्दवे च संयोज्य, एकीकृत्य रेचके पिङ्गलया ।

ॐ हुं बहिःचैतन्याय नमः । इति बहिर्मन्त्रेण प्राप्त कलातिकोपममाग्नेयबीजमुत्सृज्य, भवमुद्रयानिवेश्य तत्सहितया संपूज्य परमेश्वरवीर्यमिति विभाव्य, वागीश्वरेण वागीश्वरीगर्भनाड्यां क्षिप्यमाणं विभावयन्, मूलेनात्मसंमुखं

निक्षिपेत् । समूह्य दैव्यवासं परिधाय शैचाचमनानि हृदादयास्सद्योजातादि ब्रह्माभिरभ्यर्च्य, मूलेनाहुति पञ्चकं दत्वा, प्रदक्षिण पश्चिमोत्तरादिक्षु –

ॐ हां ब्रह्मणे नमः।

ॐ हां विष्णवे नमः ।

ॐ हां रुद्राय नमः ।

ॐ हां अनन्ताय नमः । इत्यभ्यर्च्य

अग्नि शिरोरक्षां कृत्वा

शिवाग्निस्थं हुताशने शं नमस्कृत्य पितरौ विसृजेत् ।

ततो अग्निहत्पद्मे शिवं पूर्ववदभ्यर्च्य नैवेद्यातिलादिभिः यथाशक्तिमूलेन ब्रह्माङ्गैश्च दशांशतो हुत्वा पूर्णां दत्वा, नैवेद्याय च चरुं हुत्वा आचमनचन्दनताम्बूलं दत्वा, शिवाग्निरपेक्षं विसृजेत् । ॐ भूःस्वाहा । ॐ भुवः स्वाहा । ॐ सुस्वाहाः । ॐ भूर्भुवस्सुवस्वाहा । इत्याहुति चतुष्टयं दत्वा, ब्रह्मादिभ्यो बलिं दत्वा, पश्चात् वह्निं नमस्कृत्य, हुतं भुक्तोपरमेत्य त्यक्त्वा,

ॐ हां शिवाग्नये नमः।

इति वह्निं विसृज्य, ब्रह्मादीनपिव्युत्क्रमेण विसृजेत् । ततस्तद्दक्षिणे भागे कमण्डलुद्वये संपाद्य, प्रथममण्डले पूर्वाद्युत्तरान्तदिक्षु ॐ हां कद्रेभ्यो नमः ।

ॐ हां मातृभ्यो नमः ।

ॐ हां गणेभ्यो नमः ।

ॐ हां यक्षेभ्यो नमः ।

ईशानकोणेषु । ॐ हां गृहेभ्यो नमः ।

ॐ हां असुरेभ्यो नमः ।

ॐ हां राक्षसेभ्यो नमः ।

ईशानाग्नेय नैऋतेषु मण्डलमध्ये ॐ हां महालक्ष्म्यै नमः

ॐ हां शशिभ्यो नमः ।

ॐ हां विश्वेभ्यो नमः ।

वायुवरुणयोर्मध्ये ॐ हां क्षेत्रपालाय नमः ।

इत्यभ्यर्च्य, स्वाहान्तमध्ये दत्वा,

द्वितीयमण्डले पूर्वाद्यष्टदिक्षु - ॐ हां इन्द्राय नमः ।

ॐ हां अग्नेय नमः ।

ॐ हां यमाय नमः ।

ॐ हां निर्ऋतये नमः ।

ॐ हां वरुणाय नमः ।

ॐ हां वायवे नमः ।

ॐ हां सोमाय नमः ।

ॐ हां ईशानाय नमः ।

ईशाने ॐ हां ब्रह्मणे नमः ।

नैऋते ॐ हां विष्णवे नमः ।

मध्ये ॐ हां नीललोहिताय नमः ।

इति संपूज्यार्घ्यं दत्वा,

पूर्वं रुद्रादिभ्यो बलिं स्वाहान्तं निक्षिपेत्,

आचमनं दत्वा, इन्द्रादिभ्यो तथैव बलयाचमनं दत्वा, बहिः वाय्वादि ईशदिग्भ्य स्वाहेत्यभ्यर्च्य बलिं दत्वा, ॐ हां अग्न्यादिभ्य स्वाहा ॐ हां सर्वेभ्यो ग्रहवास्तुदेवेभ्यस्वाहेति पृथक् पृथक् बलिं दत्वा, सर्वान् विसृजेत् । यदि वा संक्षेपक्रमेणानेन बलिं दद्यात् ।

ॐ ऐं रुद्ररौद्रक्रमेण रौद्रस्थाननिवासिनः ।

सौम्याश्चैवतु ये केचित् सौम्यस्थाननिवासिनः ।

मातरो रुद्रसूनाश्च गणानामधिपाश्च ये ।

सर्वे सुप्रीतमनसां वृत्तिं गृहणं तु इमां बलिम् ।

सिद्धं जुषं तनुः क्षिप्रं भयेभ्यः पातु नित्यशः ।

इत्येवं च बलिं दत्वा मन्त्रेस्वरादि विन्यसेत् ।

ततः स्तोत्रवन्दनादिकं कृत्वा सकलीकृत्य सागृहस्त शिवान्तिकं गत्वा, मत्कृतं यत्करिष्यामि तत्सर्वे सुकृतं तव । विश्वगोप्तात्वमेवात्र नान्योनाथो हि मे शिव । इति विज्ञाप्य, स्वाहान्तमूलेन पूजाहोमादिकं मम गृहाण भगवन् पुण्याचलमित्यभिधाय चरवाहांस्तेत्यर्घ्यजलेन सहोद्भव-मुद्रयासुस्थितजानुं निवेदयेत् । ततोष्टपुष्पिकया संपूज्य सद्योजातादि क्रमेण मूलेन शिवमभ्यर्च्यार्घ्यं दत्वा

अस्त्रादीशानान्तं पूजोपयुक्ततिलेभ्योर्घ्यं दत्वा, काम्यमन्त्रान् स्वावाङ्गतौ संयोज्य, नाराचमुद्रयास्त्रेण मन्त्रान् पुष्पक्षेपणाताघ्यं संस्मृत्य, दिव्यमुद्रया मूर्तिमन्त्रेण मूर्तौ संयोज्य, मूलेन शिवमभ्यर्च्यार्घ्यंदत्वा रक्षापुष्पं महामुद्रया विधाय, क्षमस्व एतत् इति ब्रूयात् । तद्यथागौर्यार्चनं पूर्ववत् वा कारणे । अथान्तं संप्रवक्ष्यामि गौर्यायामर्चनं तथा ॥

गौरी चैवमनोन्मण्या भवान्यासिविधिं भवेत् ।

द्विनेत्रां द्विभुजांश्यामाङ्गौरीदक्षकरोत्पलाम् ।

वामहस्ताभयं तथा सर्वाभरण भूषिताम् ।

संविभक्तमङ्गं समभङ्गमुच्यते तान्त्रवक्तव्यकृतिं च सुस्थितम्

लम्बमेव करदक्षिणोत्फलं लज्यभावमनुसारवल्कलम् ।

गौरी लक्षणमेवोक्तं मनोन्मण्यास्वरूपकम् ।

मनश्शक्तिक विज्ञेयः उन्मनः परमः शिवः ।

मनोन्मनसम्बन्धात् मनोन्मण्यभिधीयते ।

इन्दुनिभवेदकरवह्निनयनं स्यात् ।

पङ्कजवराभयकरोत्पल चतुष्कम् ।

अङ्गहिमभूषणविचित्रनयनं स्यात् ।

तुङ्गमकुटोज्वल मनोन्मणीस्वरूपम् ।

मनोन्मणीमिदं प्रोक्तं भवानीलक्षणं श्रृणु ।

श्यामवर्णो द्विनेत्रं च चतुर्हस्तं जटान्वितम् ।

अभयं अक्षमालांश्च पद्मकट्यावलम्बितम् ।

सर्वाभरणसंयुक्तं दुकूलवसनान्वितम् ।

स्थित पद्मासनायुक्तं चन्द्रार्धकृतशेखरम् ।

एतल्लक्षणसंयुक्तां कामकोट्यां द्विजोत्तमाः ।

चतुर्भुजत्रिनेत्रं च वरदाभयसंयुताम् ।

पद्मश्चाक्षमालाञ्च वामे तु दक्षिणे तथा ।

करण्डमकुटोपेतां सर्वाभरणभूषिताम् ।

रक्तवर्णोज्वलां शुक्लां वस्त्रेणैव तु वेष्टयेत् ।

चतुर्भुजां त्रिनेत्रां च सुप्रसन्नेकवृत्तिकाम् ।

दुकूलवसनां देवीं करण्डमकुटान्विताम् ।

एवं ज्ञात्वा विशेषेण ध्यायेत् देवीं समर्चयेत् ।

श्यामाभासं त्रिनेत्रां युगसूर्यसहितां दक्षिणे चाक्षमालां नतत्पूर्वे चोत्पलं स्यात् . . . मपररुजो इतशुष्कं च वाश्यन्यक्रौ कुण्डलभृत् करार्धमकुटां पीताम्बराढ्यां स्थिताम् ।

वन्देहं शिवकामसुन्दरीपदाम्भोरुहां सन्ततम् ।

सामां द्विनेत्रां द्विभुजां त्रिभङ्गीं सव्यापसव्यस्थित कुञ्चिताङ्घ्रीम्।

सव्योत्पलासत्कटकाथ वायव्यालम्बहस्तापरमेश्वरी च ।

चतुर्भुजं त्रिनेत्रं च करण्डमकुटान्वितम् ।

पद्मनीलोत्पलं हस्तं अभयं वरदान्वितम् ।

सुस्थितं वा संयुक्तं तु पराद्युपशोभितम् ।

चतुर्भुजं त्रिनेत्रश्च करण्डमकुटान्वितम् ।

कमण्डुलद्विहस्तेन अभयं वरदान्वितम् ।

सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।

भुजद्धयसमायुक्तं विश्वादार्कं करान्वितम् ।
द्क्षोत्पलधरां देवीं सर्वाभरणभूषिताम् ।
करण्डमकुटोपेतां नेत्रद्धयसमन्विताम् ॥
श्यामवर्णसमायुक्तमासीनं वास्थितामयी ।
योगं भोगं च वीरं च शक्तित्रयमित्यवस्थितम् ।
योगपीठसमायुक्तं भो . . . वामसमन्वितम् ।
वीरं स्वतन्त्रमित्युक्तं शक्तिरेव त्रिधा भवेत् ।
वृत्तपीठं तु चासनम् ।
शयनं पद्मपीठं स्यात् पीठशक्तिरिहोच्यते ।
देवेन सहिता वापि स्थानकासन संयुताम् ।
देवेन सहिता वापि केवलं च प्रकीर्तिताः ।
एकासने च देव्ये च एकमूर्तिर्विभावयेत् ।

नित्यपूजाविधि समाप्ता ।

हरिः ओम् ।

॥ शुभमस्तु ॥

குறிப்புகள்

****

1. சிவலிங்கத்தின் பிரம்ம-விஷ்ணு-ருத்ர பாகங்களுக்கு இந்நூலில் விளக்கப் படம் 1-ஐ பார்க்கவும்.

2. த்வஜஸ்தானம் என்பது ஆலயங்களில் கொடிமரம் நிர்மாணிக்கப்படவேண்டிய இடம்.

3. மஹாமத்யம் என்பது கருவறைக்கும் கோவிலின் நுழைவு வாயிலுக்கும் இடையில் உள்ள தூரத்தை மூன்றாக பிரித்தால் அதன் நடுப்பகுதி.

4. 18 நாட்களுக்கு ஒருமுறை எனில் ஒன்பதும்,7 நாட்களுக்கு ஒருமுறை எனில் 14ம், ஐந்து நாட்களுக்கு ஒருமுறை எனில் மூன்றும், தினமும் பத்தும், இரு வேளைகளிலும் எனில் வேளைக்கு ஆறும், ஆலயங்களில் போடும் பலிகளின் எண்ணிக்கை கூறப்பட்டுள்ளது.

5. சிவபூஜைக்கு தகுதியுடைய சிவாசார்யார் கருவறைக்குள்ளும், வேதம் ஓதும் அந்தணர்கள் கருவறைக்கு முன் உள்ள அர்தமண்டபம் வரையிலும், அரசர்களும் மற்றும் அரசு அதிகாரிகளும் அர்தமண்டபத்திற்கு முன் உள்ள நிருத்த மண்டபம் வரையிலும், மற்றவர்கள் அதற்கு முன் உள்ள மண்டபம் வரையிலும் ப்ரவேசிக்கலாம் என்று கூறப்பட்டுள்ளது.

6. பட விளக்கத்திற்கு இந்நூலின் விளக்கப்படம் 2ஐ பார்க்கவும்.

7. காமிகம், யோகஜம், அசிந்த்யம், காரணம், அஜிதம், தீப்தம், சூக்ஷ்மம், ஸஹஸ்ரம், அம்சுமான், சுப்ரபேதகம், விஜயம், நிச்வாசம், ஸ்வாயம்புவம், அனிலம், வீரம்,

ரௌரவம், மகுடம், விமலம், சந்த்ரஞானம், பிம்பம், ப்ரோத்கீதம், லலிதம், அசித்தம், சந்தானசர்வோக்தம், பாரமேச்வரம், கிரணம், வாதுலம் எனும் 28-ம் மூல சைவ ஆகமங்கள்.

8. பூர்வாதாரம், ஜயாதி, ப்ராஜாபத்யம், வ்யாஹ்ருதி முதலியன ஸ்ருவத்தினாலும், உத்தராதாரம், ப்ரதானாஹுதி, ஸ்விஷ்டக்ருத், ப்ராயச்சித்தம் முதலியவை ஸ்ருக்கினாலும் செய்யப்படவேண்டும்.

9. படவிளக்கத்திற்கு இந்நூலின் விளக்கப்படம் 3ஐ பார்க்கவும்.

10. ஒரு அடி நீள அகல உயரங்களைக்கொண்டதும், மூன்று மேகலையை கொண்டதுமான சதுரகுண்டம் அனைத்து தேவதைகளுக்கும் பொருத்தமானது.

11. முப்பத்தாறு அங்குலம் அல்லது ஓரிரு அங்குலம் குறைவாக ஸ்ருக் ஸ்ருவங்கள் இருக்கலாம். பொதுவாக பன்னிரெண்டு அங்குல கைப்பிடியும், எட்டு அங்குலம் முகப்பையும் 4 அங்குலம் முகப்பு ஆழத்தையும் கொண்டதாக ஸ்ருக், ஸ்ருவங்கள் இருக்கவேண்டும் என்பது கருத்து.

12. 6 அங்குல பரப்பளவையும் இரண்டு, ஒன்று அல்லது அரை அங்குல ஆழத்தையும் உடைய பொன் மற்றும் வெள்ளியினால் செய்யப்படுவது ஆஜ்யபாத்திரம்.

13. ஐந்து, நான்கு அல்லது மூன்று அங்குல பரப்பளவுடன் ஒரு அங்குல ஆழமுடையது சருபாத்திரம் எனப்படும். இரும்பு அல்லாத உலோகத்திலோ, மரத்திலோ அல்லது காய்ந்த இலைகளிலோ இது செய்யப்படலாம்.

14. ஐந்து அங்குல பரப்புடன், இரண்டு அங்குல ஆழத்தில் மரம், காய்ந்த இலை, இரும்பு அல்லாத உலோகம் இவைகளால் செய்யப்படுவது ப்ரோக்ஷணீ பாத்ரம்.

15. ஆறு அங்குல பரப்பளவும், மூன்று அங்குல ஆழமும் கொண்ட மரம், காய்ந்த இலை, இரும்பு அல்லாத உலோகத்தால் செய்யப்படும் பாத்ரம் ப்ரணீதா பாத்ரம்.

16. இத்மம் என்பது ஹோமங்களில் பயன்படுத்தப்படும் மரக்குச்சிகளாகும். கிருமிகளால் துளைக்கப்படாததும், நெருப்பினால் எரிக்கப்படாததும், அதிகமாக வளையாதவைகளும் பன்னிரெண்டு அங்குல நீளமும், சுண்டுவிரல் பருமனும் சூர்ய ஒளியில் காய்ந்தவைகளான குச்சிகள் ஹோமத்தில் பயன்படுத்தப்படவேண்டும்.

17. மட்டை உரிக்கப்படாத தேங்காய், பேரிச்சை, வெல்லம், தாம்பூலம், வாழைப்பழம் இவைகளுடன் சேர்ந்த ஆஜ்ய ஆஹுதிக்கு பூர்ணாஹுதி என்று பெயர். இது ப்ரதான ஹோமங்களின் முடிவில் செய்யப்படவேண்டிய ஒன்று.

18. எண்ணெய், வெல்லம், கௌரிகம், குக்குளம், பொடித்தமணல், மரப்பசை, சஜ்ஜீரம், லாக்ஷகம் (சிந்தூரம்) இவை முறையே ஒன்று, இரண்டு, மூன்று, நான்கு, ஐந்து, ஆறு, ஏழு, மூன்று பாகங்கள் கொண்டு தாம்ரபாத்திரத்தில் அக்னியினால் சமைக்கப்படுவது. இதற்கு அஷ்டபந்தனம் என்று பெயர்.

19. எஜமானனின் ஒருகை அல்லது அதன் இரண்டு மடங்கு நீளம் கொண்டதாக சிவாலயங்களுக்கு முன் சூல வடிவிலோ தண்ட வடிவிலோ அமைக்கப்படும் கம்பம் தூஷ்ணீ ஸ்தம்பம் எனப்படும்.

20. ஸ்தூபியின் மொத்த உயரம் மூன்றாக பகுக்கப்பட்டு அதன் கீழ்பாகமான ப்ரம்ம பாகம் சதுர வடிவத்திலும், நடுப்பகுதியான விஷ்ணுபாகம் எண்கோணத்திலும், மேல் பகுதியாக ருத்ராம்சம் வட்ட வடிவிலும் அமையவேண்டும்.

21. நடுவில் ஆரண்யம், மேற்கில் கனகா, வடக்கில் ரக்தா, தெற்கில் கிருஷ்ணா, கிழக்கில் சுப்ரபா, வடகிழக்கில் பஹுரூபா, தென்கிழக்கில் அதிரக்தா என்பவை அக்னியின் ஏழு நாக்குகள்.

22. ஆலயத்தின் கிழக்கில் ஈசனுக்கு எதிரில் நந்திகேஸ்வரரும், அவர் அருகில் சூர்யனும், தென்கிழக்கில் விநாயகரும், தெற்கில் மருத்தேவதைகளும், தென்மேற்கில் சரஸ்வதியும், அவரருகில் ப்ரம்மாவும், மேற்கில் முருகனும், வடமேற்கில் துர்கையும், அருகில் சங்கரியும், மேற்கு பக்கத்தில் நடுவில் விஷ்ணுவும், வடகிழக்கில் க்ஷேத்ரபாலகரும், இவர்களுக்கு நடுவில் ஈசனுக்கு இடப்புறத்தில் சண்டீசரரும், கிழக்கு நோக்கிய நுழைவாயிலைக்கொண்ட ஆலயத்தில் அமைக்கப்பட வேண்டும். வேறு சில ஆகமங்களில், கருவறை தொடங்கி கோவிலின் மதில்சுவர் வரை உள்ள இடத்தை பத்து பாகமாகப் பிரித்து அதில் கருவறையிலிருந்து பத்தாவது பாகத்தில் காலபைரவர் முதலான தேவதைகளையும், ஒன்பதாவது பாகத்தில் ப்ரம்மா சம்பந்தப்பட்ட தேவதைகளையும், எட்டாவது பாகத்தில் விஷ்ணு சம்பந்தப்பட்ட தேவதைகளையும், ஏழாவது நிலையில் முருகனையும், ஆறாவது பாகத்தில் சரஸ்வதியையும், ஐந்தில் சூர்யனையும், நான்கில் கணபதியையும், இரண்டு மூன்று பகுதிகளில் முக்கிய பெண் தேவதைகளையும் ஸ்தாபிக்கவேண்டும் என்று கூறப்பட்டுள்ளது.

23. 32 தர்பைகளைக்கொண்டு முனையுடன் திரிக்கப் பட்ட கூர்ச்சம் உத்தமம் என்றும், 16 தர்பைகளைக்கொண்டது மத்யமம், ஒன்பது, ஏழு போன்ற தர்பைகளைக்கொண்ட கூர்ச்சம் அதமம் என்றும் அழைக்கப்படும்.

24. கும்பத்தில் சுற்றப்படும் நூல் எள்ளின் பருமனைக்கொண்டது உத்தமம் என்றும், யவதான்யத்தின் பருமனைக்கொண்டது மத்யமம் என்றும், யானையின் கண் போன்ற பருமனைக்கொண்டது அதமம் என்றும் அழைக்கப்படும். ஈசனை ஆவாஹிக்கும் கும்பத்தில், மூன்று நூலிழைகளைக் கொண்டும், இறைவியை ஆவாஹிக்கும் கலசத்தில் இரு இழைகளை கொண்டும், மற்ற தேவதைகளுக்கு ஒரு நூலிழை கொண்டதாகவும் இருக்கவேண்டும் என்று கும்பசூத்ர லக்ஷணம் விளக்குகிறது. கும்பத்தின் நூல் சுற்றும் பொழுது, சுற்றப்பட்ட நூல்களுக்கு இடையிலுள்ள இடைவெளியானது எள் பருமனாக இருந்தால் அது உத்தமம் என்றும், யவதான்ய பருமன் உடையது மத்யமம் என்றும் யானையின் கண்ணை ஒத்த பருமனுடையது அதமம் என்றும் அழைக்கப்படும். கலசத்தில் சூத்ரமானது நெருக்கமாக சுற்றப்படவேண்டும் என்பது இதன் தாத்பர்யமாகும்.

25. சிவலிங்கத்தில் கோமுகம் அல்லது அபிஷேகநீர் வெளிவரும் பகுதி வடக்கு நோக்கி இருப்பது சிறந்தது. கோமுகத்தின் நீர் வருகின்ற பகுதியின் ஆழம் குறைந்தது மனிதனின் கட்டைவிரல் பருமனாவது இருக்கவேண்டும். கிழக்குமுகமாக கோமுகம் எப்பொழுதும் அமைக்கக்கூடாது.

26. பைத்ருகம், சௌம்யம், ஸ்ரீகரம், பார்த்திவம், சாத்விகம், சைவம் என்று உத்சவங்கள் ஆறு வகைப்படும். இவை முறையே 12, 9, 7, 5, 3 மற்றும் 1 நாள்களில்

கொண்டாட கூடியவை. இவைகளில் பார்த்திவம், சாத்விகம், சைவம் ஆகியவைகளில் த்வஜாரோஹணம் கிடையாது.

27. காமிகம், சிவபுருஷ சரீரத்தின் பாதகமலமாகவும், யோகஜம் கணுக்காலாகவும், அசிந்த்யம் கால்விரல்களாகவும், காரணம் முழங்காலாகவும், அஜிதம் முழங்கால் முட்டியாகவும், தீப்தம் துடையாகவும், சூக்ஷ்மம் குஹ்யமாகவும், ஸஹஸ்ரம் இடையாகவும், அம்சுமான் முதுகாகவும், சுப்ரபேதம் நாபியாகவும், நிச்வாசம் ஹ்ருதயமாகவும், ஸ்வாயம்புவம் மார்பகமாகவும், அனிலம் தலையாகவும், வீரம் கழுத்தாகவும், ரௌரவம் காதுகளாகவும் மகுடம் மகுடமாகவும், விமலம் கைகளாகவும், சந்த்ரஞானம் மார்பாகவும், பிம்பம் வாயாகவும், ப்ரோத்கீதம் நாக்காகவும், லலிதம் கன்னப்பகுதிகளாகவும், அசித்தம் நெற்றியாகவும், கிரணம் ரத்னாபரணமாகவும், வாதுலம் ஆடையாகவும் மற்றவை அணிகலன்களாகவும் கருதப்படுகின்றன.

28. புற்றுமண் எடுத்து பாலிகை அமைத்தல்.

29. பிம்பங்களை நீர் தான்யம் முதலியவைகளில் மூழ்கடித்து வைத்தல்.

30. பிம்பங்களை அல்லது தேவதைகளின் திருவுருவச்சிலைகளை மந்திரங்கள் மற்றும் ஆகமங்களில் கூறப்பட்டுள்ள முறைப்படி சுத்தம் செய்தல் அல்லது புனிதமாக்குதல்.

31. காப்புக்கட்டுதல்.

32. ஒவ்வொறு நாளும் அளிக்கும் பலி.

33. பரிவார தேவதைகளுக்கு அளிக்கப்படுகின்ற பலி.

34. நவசந்தி என்று சொல்லக்கூடிய, ஆலயத்தை சுற்றி ஒன்பது இடங்களில், அந்தந்த இடத்திற்கான தேவதைகளை, அங்கு ப்ரதிஷ்டை செய்யப்பட்டுள்ள பலி பீடத்திலோ அல்லது அஸ்த்ர தேவருடன் எடுத்து செல்லுகின்ற பலிபீடத்திலோ ஆவாஹனம் செய்து அந்தந்த தேவதைகளுக்கான பலியை அவர்களுக்கு உரித்தான வேத மந்திரங்கள், இசை, நாட்டியம் இவைகளுடன் இணைத்து அளிப்பது சந்த்யாஹ்வான சந்த்யாவாஹன பலியாகும்.

35. கிராமத்தையோ அல்லது நகரத்தையோ அலங்கரிக்கப்பட்ட இறைவனின் திருவுருவச்சிலை வலம் வருதல்.

*****

விளக்கப் படம் - 1



விளக்கப்படம் - 2



1 - கர்ப்ப க்ருஹம்

2 - அந்தராளம்

3 - முகமண்டபம்

4 - நந்தி மண்டபம்

5 - மத்யரங்கம்

6 - ஸுபத்ரம்

7 - கோபுரம்

விளக்கப்படம் - 3



1 - ம்ருகீ



2 - ஹம்ஸீ



3 - ஸூகரி

வேண்டுகோள்

கருணையுள்ளங்கொண்ட நம் முன்னோர்கள் அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும், பனை ஓலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவை, பல்வேறு இடங்களில் முடங்கியுள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகால் நூலகத்திற்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவை மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன்மூலம் சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப் புகழை, பெருமைசால் சரசுவதி மகால் நூலகம் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயர் இடம்பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே, நாம் பெற்ற பேறு பெறுக இவ்வையகம் என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடம் உள்ள சுவடிகளைச் சரசுவதி மகால் நூலகத்திற்கு தந்துதவ வேண்டுகிறேன்.

மாவட்ட ஆட்சியர் மற்றும் இயக்குநர்,

சரசுவதி மகால் நூலகம்,

தஞ்சாவூர் - 613 009

Wrapper Design & Printed at VDJ Offset Printers Tnj: Ph 230563